अथशिवोदितकल्पलताओषधीनांप्रारंभोयं

२४

श्रीगुरुगणपतीष्टदेवताभ्योनमः॥ श्रीमहाकालिदेवतायैनमः॥ अथातेसं
प्रवक्ष्यामित्रिभुवनेश्वरिपद्धति ॥शृणुष्वएकचित्तेननरसङ्घेप्राणवल्लभे॥१॥
औषधीश्रुत्कृपसेतुचतुर्दश्यांगुरुपुष्येचलक्ष्मणां॥ समंत्रंतुसमुच्चार्यसो
पचारंसमुद्धरेत्॥२॥ ॐसर्वार्थसाधनिलक्ष्मणायैस्वाहा॥ शुभंतन्मू
लमादायकृष्णोन्मत्तफलेस्थितं॥ त्रिदिनंचस्वश्रुक्रेणमंत्रचूर्णनवश्यक
त्॥३॥ रोचनंलक्ष्मणामूलंचंदनंकुंकुमंसमं॥मुखलेपादितःसर्वविशेषय
नरमोहनं४॥ ॐवशीनमोनमः॥ तन्मूलंमूलतांतस्थं पल्लवाद्राजवश्य
कृत्॥तन्मूलमेवचस्वर्णारम्भभक्ष्रररसभावितं॥५॥ नरूपधूपितंदेहंरक्षासे

भवमुहूर्ते॥६॥ अथशिवलिंगीकल्पः॥ ॐश्रींईश्वरिसर्वदानववशंकरि
नारासाधिन्येस्वाहा॥ इत्यमुनामंत्रेणगंधादिभिरनुष्ठितान्॥त्रिधासूत्रे
णसंवेष्ट्यगुटिकांसंप्रपूजयेत्॥१॥ पुष्येवरिवलीकृत्स्नेगृहीत्वास्वजरांपि
बेत्॥ क्षीरस्मुरुद्रेनरत्वर्थैरमतेयसहस्रशः॥२॥ भावितंपंचशतधातन्कू
लंकृनकांबुना॥ तत्तैलस्यविलेपेननत्करोतिनिरंबधः॥३॥ आत्माबुपिष्ट
तत्कल्कंलेपेनांगेनमोहनं॥ सद्योजयतिदुर्वारंवैरिणंविजयोभवेत्॥४॥
धृताशिरस्त्रिपुष्यांर्कूंमंत्रमुच्चार्यपूर्ववत्॥ ईश्वरीसकलोभीतिनिहंतीति
नसंशयः॥५॥ सहदेवीश्वरीमूलंमयूरशिखयासह॥ततःप्रदक्षिणीकृत्य

भक्त्यास्तुत्वा प्रणम्यच ६॥ तत्रसूर्योदयात्पूर्वंमंत्रमष्टोत्तरंशतं॥ जप्त्वाचपा
दलेपेन दिनैर्नैकेन मानवः॥ ७॥ विंशद्योजनगोभूत्वा पुनरेतीति चालयेत्॥
रोचनामूलमैश्वर्यस्य कल्कीकृत्य मंबुना ८ जप्त्वाचाष्टोत्तरशतं पूर्वमंत्रं
विचक्षणः। श्रीखंडमीश्वरीमूलं कुंकुमागरूरंकणं॥ ९॥ रोचनाच्चसमंसर्वं
एतदंगानुलेपनात्॥ दर्शनस्पर्शनादेवनरनारीविमोहनं १० समंत्रंमानि
नंवापि स्ववशंकुरुतेनरं॥ ईश्वरीमूलमादाय ग्रहणे सोमसूर्ययोः ११
चूर्णितंनेत्रयान्यस्तं करस्थं वा ग्रहापदं॥ समस्तरोगशांतिंच ईश्वरीमूल
सेवनात्॥ १२॥ तदेवनस्येविन्यस्तं कांजिकेनविषापहं॥ तदेवाशनसंयुक्तं

3 2

जंगमादिविषंहरेत्॥ १३॥ अथकरंजकल्पः॥ करंजपल्लवान्मध्वान्घृतेनप
रिपाचितान्॥ सद्योजयतिदुर्वारमाहतस्य विजृंभणं १॥ तैलेनपाचितांस्त
स्यजटांवैचानुकोमलां॥ जयेदवश्यंनियतंसंधिवातंनसंशयः॥ २॥ ॥
अथपुनर्नवाकल्पः॥ पुनर्नवस्यशुभ्रस्यमूलंगोघृतमिश्रितं॥ अंजितं
हरतिक्षिप्रंनेत्रांतरगतान्जान्॥ ३॥ आज्येनपुष्पंमधुनाम्बुपानंफाग्पा
चकंडूपटलंचनित्या॥ रात्र्यंधमाज्येननिशाचरोमापुनर्नवानेत्ररुजोपहं
त्री २॥ रक्तार्थेसंप्रजीर्यत्वेपसेरोधोनिशामिस्रा॥ छायाशुष्कंचतच्चूर्णं
समूलफलपल्लवान् ३॥ सिंधूत्थगोघृतेनोक्तांगुल्मप्लीहविनाशनं॥

४

तच्चूर्णं सितया सार्द्धं यष्टीक्षीरेण यः पिबेत् ४॥ प्रभातकाले सततं जीवेत्पुरुशरदां

शतं॥ तच्चूर्णं ज्योतिसंयुक्तं कायानलविवर्धनं ५ तज्जयं वारिणा पिष्ट्वा नेत्रमा

जीर्णनाशिनी॥ शिखामधुसमायुक्तासेविताच्च जरां जयेत् ६ पुनर्नवा शिफा

चूर्णं पलार्धं पयसा सह॥ मासैकं मासयुग्मं वा पीतं जीर्णेन भोजनं ७ क्षीरा

न्यथवा विनश्यंति शिरोरोगज्वरादयः॥ अथ पालाशकल्पः॥ पाताले मंत्रमा

हृत्य पालाशतरुबीजकं॥ निष्कद्वयमिदं तैलं मधाज्येन समं पिबेत् ८ मासमा

त्रेण भोगी द्रोन स्त्रत्राण्यपि पश्यति॥ अनेककालजीवी स्यात् प्रियमानं सु

करे॥ ९॥ धात्रीरसेन तद्बीजचूर्णं सम्यग्विभावयेत्॥ सप्ताहं पयसा तद्धो

५

३

षयित्वा न तत्पुनः १० सप्ताहं सेवनात्तस्य दूरदृष्टिर्भवेन्नरः। तेजसा सूर्य

संकाशी आल्हादे चंद्रमा इव ११॥ अतिदारुणवेगेन वायुं तुल्या बृहस्पतिः

वाचा सरस्वती जिह्वाजीवेराचं नोद्धरकं १२ आतपे शोषितं तस्य प्रसरनजनि

तं रजः॥ क्षीरेणार्द्रीकृतं स्निग्धं भांडे विन्यस्य संस्थितं १३ एकविंशदिना

दूर्ध्वं स्कमुहूर्ते शिवांतिके॥ तद्रसेत्य पयसाहारं कांजिकाम्लादिवर्जितं॥१४॥

एकविंशदिनात्तस्य कल्पेन त्वच रोमभवेत्॥ बलेन रोचवत् भीमसेनतुल्य

पराक्रमः १५ जरामरणनिर्मुक्तो नकदाचित्तसं यं व्रजेत्॥ तद्द्वचूर्णं समाद

पि यपलमात्रं प्रवेद्यादि १६ चतुःपलेन दुग्धेन मासमात्रं न संशयः॥ तन्मत्रे

णमशांनोस्वं तामत्र स्वर्णसमां भुमाद्॥ १७॥ अनेककालजीवी स्यात् कंदर्प

रवमृत्रिमान्॥ मलवृक्षस्य पंचांगं छायाशुष्कं सुचूर्णितं १८ मध्वाज्याभ्यां लि
हेत्कर्षं वर्धयेत्सजरां जयेत्॥ जीवेद्वर्षसहस्रैकं दिव्यकायो भवेन्नरः॥१९॥
ब्रह्मवृक्षमितस्थूलं छेदयेद्रूर्ममागतः॥ अधोज्वरलिहस्तं स्यात्तस्यमूर्ध्नि
जलंकृतं॥ पंचजातीफलैः पूर्यत काष्ठेन निरुध्य च॥ कुशैस्तु वेष्टयेत्सर्वं
लेप्यं मृद्गोमयैः पुनः २१॥ अवेष्टयवस्त्रखंडेन ततो मृद्भोमयैर्लिंपेत्॥ पु
फेगजपुटंदेयं परितोरण्यकोद्भवैः २२ स्वांगशीतलमुद्धृत्यसद्रवानि फ
लानि च॥ भक्षेन्मध्वाज्यसंयुक्तोश्वादितान्येव भक्षयेत् २३ यथेष्टपुष्प
हांतस्थक्षीराहारीजरांजयेत्॥ छिद्रूपश्यतिमासेन निधानानि च भूतले २४
जीवेद्ब्रह्मदिनं यावत्सर्वरोगविवर्जितः॥ पत्रं पुष्पं फलं ग्रासं सूक्ष्मचूर्णं तु का ५

रयेत्॥२५॥ कृष्णगोक्षीरसंयुक्तं भक्षयेद्वा समाहितः॥ द्विरष्टवर्षकायो सौ जी
वेद्वर्षशतत्रयं २६॥ तस्य पुष्पस्य निर्यासं तारकेन्नेण सुभावितं॥ तेन नालस्य क
ल्केन द्वात्रिंशांशेन वेधति २७ वंगं भवति तत्तारं कंदपुष्पस्य संनिभं॥ तस्य पुष्प
रसश्चैव गंधकं चैव भावितं २८ लिप्तानि शुल्वपत्राणि पुटयाकेन कांचनं॥ तस्य
बीजस्य यत्तैलं गंधकेन सुमर्दितं २९ पारदं तेन कल्केन द्वात्रिंशत्कांचनं भवेत्॥
श्वेतपालाशपंचांगं चूर्णितं मधुना सह॥ ३० कर्षैकं भक्षयेन्नित्यं व्याधिमृत्युजराप
हं॥ ब्रह्मायुर्जायते सिद्धिस्पर्शमात्रेन संशयः ३१ ॐ अमृतं कुरु अमृतमालित
न्येनमः॥ अमृतमंत्रेण सर्वे योगाः समाभिमंत्रिताः करणीयाः॥ अथान्यच्च
पालाशकल्पः॥ कैलासशिखरे रम्ये नानाधातुविचित्रिते॥ नानाद्रुमलताकीर्णे

नानापुष्पोपशोभिते ३२ देवैर्दैत्यैश्चमुनिभिरप्सरोगणसेविते॥महादेवंतुदेवे
शंषण्मुखःपर्यपृछत ३३ कथयस्वप्रसादेनमनुष्याणांहितायवै॥आयुष्या
र्थंतुसंप्राप्तंरसायणमनुत्तमं ३४ शिवउवाच॥साधुषण्मुखतत्वेनरहस्यंदुर्ल
भंपरं॥मोक्षार्थैश्चधनार्थैश्चकामार्थैश्चविशेषतः॥३५॥ब्रह्मवृक्षस्यबीजा
निवितुषीकृत्यबुद्धिमान्॥अथधात्रीरसेनैवअजाक्षीरेणभावयेत्॥३५॥स
माहंशोषयित्वाचयोजयित्वाविचक्षणः॥बीजंयंत्रेणततःक्षिप्त्वातैलंसंगृह्य
यत्नतः॥३६॥तत्तैलंपलमात्रंतुपाययित्वाविधानतः॥तस्यकर्मप्रवक्ष्यामिमनु
ष्याणांहितायच॥३७ एकमासप्रयोगेणक्षीराहारःप्रयत्नवान्॥द्विगुणंपरि
हारासौसत्तैलंगुरुवर्जितं ३८ श्रुतित्वंधारयेद्धीरःस्वर्णोयुताकृतिः॥सुभगो ५

९

दर्शनीयस्तुनवनागबलोपमः॥४०॥सुवर्णवर्णसदृशःकर्णिकारसमद्युतिः
षण्मासस्यप्रयोगेणजीवेद्वर्षसहस्रकं॥४१॥प्रथमंतेसमाख्यातंद्वितीयंशृणु
षण्मुख॥अहंसम्यक्प्रवक्ष्यामितवस्नेहेनपुत्रक ४२ तैलस्यपलमात्रंतुमधु
नासहयःपिबेत्॥ इतिहासपुराणानांश्रोतावक्ताचजायते॥४३॥विधानम
द्भुतंपश्येद्भूमेराकाशगामिनः॥मेधाविनांसुपुत्राणांसहस्रंलभतेनरः ४४ यां
यांकामयतेनारींसाभवन्नवयौवना॥तस्यमूत्रपुरीषाभ्यांलोहंभवतिकांचनं ४५
वर्षाणित्रीणिद्वेवापिषण्मासमथवापिच॥अथवावर्षमेकंतुयत्नतस्तैलंपिबेन्नरः ४६
देहेहेमप्रजायेतस्वयंचैवाक्षयोभवेत्॥प्रयत्नेननमस्कृत्वास्वयंदेवेनभाषितं ४७
द्वितीयंकथितंवत्सतृतीयंशृणुषण्मुखं॥तैलाज्यमधुसंगृह्यमध्वाज्यकुडवंपिबेत्

त ना
तस्यपीतस्यतुफलंशृणुवक्ष्यामितत्वतः॥ संवत्सरप्रयोगेणत्विदंभवतिलक्षणं ४९
अग्निनानोदकेनापितस्यमृत्युर्नजायते॥ इतिहासपुराणानांश्रोताश्रुतिधरोभवेत् ५०
तस्यमूत्रपुरीषेणशुल्वंभवतिकांचनं॥ यस्त्वनेनविधानेनद्वादशाब्दंकरोतियः ५१ स्व
यंकृत्वचशरीरेणब्रह्मलोकंसगच्छति॥ एतत्तुपरमंगुह्यंनाख्यातंकस्यचिन्मया ५२
तृतीयंकथितंवत्सचतुर्थंशृणुपुत्रक॥ तैलस्यपुटसंगृह्यस्निग्धभांडेनिधापयेत् ५३
मासार्धेतुसमुद्धृत्यप्रसृतकायोविचक्षणः॥ कायस्यापिबलंकृत्वाक्षीराशीमुद्गभो
जनः ५४ एकंव्रतेनियमस्थस्यब्रह्मचारीजितेंद्रियः॥ सप्तरात्रप्रयोगेणकिन्नरैःसह
गीयते ५५ मेधावीसंपुष्टैश्चैवदशाहेतुनसंशयः॥ जीवेद्वर्षसहस्रंतुअक्षीणनवयौ
वनः ५६ रूपभोगोदर्शनीयश्चकेतोज्जनसमप्रभः॥ चतुर्थंतुसमाख्यातंपंचमंशृणुपु
त्रक ५७ एकैकंभक्षयेद्बीजंतिलशर्करयासह॥ संवत्सरप्रयोगेणशृणुवक्ष्यामितत्फले ५८ ६

पूर्वोक्तानांफलंतत्तुयत्फलंतस्यजायते॥ पंचमंकथितंगुह्यंषष्ठंचशृणुसांप्रतं ५९
पत्राणिब्रह्मवृक्षस्यकोमलानिविशेषतः॥ छायायांशोषयित्वातुलोहभांडेविनिक्षिपे
त् ६० सूक्ष्मचूर्णंविधायेत्थंब्रह्मचारीविशेषतः॥ गृहीत्वाचैवपुण्याहेजायतेजयमं
गलं ६१ प्रद्योतनःप्रकर्तव्यंप्रारंभेहिविचक्षणः॥ फलंचूर्णस्यसंगृह्यतक्रेणसहयःपि
बेत् ६२ जीर्णेतेभोजनंपथ्यंवेल्लेणाम्लविवर्जितं॥ तृषितस्तुपिबेत्क्षीरमथवाशीत
लंजलं ६३ मासमात्रप्रयोगेणजायतेप्यमरोपमः॥ षण्मासस्यप्रयोगेणकर्णिका
रसमद्युतिः ६४ सहस्रायुर्भवेद्धीमान्वलीपलितवर्जितः॥ षष्ठंतुकथितंवत्ससप्तमं
शृणुपुत्रक॥ ६५॥ पुष्पाणिब्रह्मवृक्षस्यसंगृह्यचविचक्षणः॥ सूक्ष्मचूर्णंततःकृत्वाचा
तुर्पेचविशोषयेत् ६६ एकविंशद्दिनंयावद्भक्षयेद्घृतिकोदनं॥ भुक्त्वातुचसमेधावी
भोजनंतुयथाक्रमं ६७॥ खदिरस्यकषायेणतृषितस्तुजलंपिबेत्॥ एकविंशतिरात्रे

णंशृणुवत्सयथाफलं ६८ मत्तमातंगगामीचवायुवेगमहाबलः ॥ जीवेद्वर्षसहस्रंतुव
ह्निज्वालासमद्युति ६९ सप्तमंकथितंवत्सचाष्टमंशृणुसांप्रतं ॥ वल्कलंब्रह्मवृक्षस्य
सूक्ष्मचूर्णंतुकारयेत् । ७० तच्चूर्णंतुसमंग्राह्यंगवांक्षीरेणयःपिबेत् ॥ पयसासतुभुंजी
याल्लघ्वाहारोजितेंद्रियः ७१ संवत्सरप्रयोगेणएवंभवतिलक्षणं ॥ नस्यमात्रेणषण्मासा
त्खोहंभवतिकांचनं ७२ ॥ शतपंचवर्षसहस्राणिसजीवेन्नात्रसंशयः ॥ अष्टमंकथितंव
त्सनवमंशृणुसांप्रतं ७३ ब्रह्मतैलंपलंग्राह्यंघृतेनसहितंपिबेत् ॥ महायोगीभवेत्
प्राज्ञोमूर्छाचैवप्रजायते ७४ क्षीराहारप्रयत्नेनमासमेकंपिबेन्नरः ॥ अदृश्योजायते
सोपिछिद्रंपश्यतिमेदिनीं ७५ अग्निनादह्यमानोपिनस्यमृत्युर्नजायते ॥ दशवर्षस
हस्राणिवलीपलितवर्जितः ७६ नवकंकथितंवत्सदशमंशृणुषण्मुख ॥ ब्रह्मतैलं

७

मधुघृतंब्राह्मीरससमन्वितं ॥ समभागानिसर्वाणिचोपभुंजीतसाधकः ॥ मास
त्रयप्रयोगेणदिवापश्यतितारकां ७८ षण्मासस्यप्रयोगेणसिद्धिर्भवतिनान्यथा ॥
ब्रह्मकोटिसहस्राणिविष्णुकोटिशतानिच ७९ तैलस्यवमनेनपरिवर्त्यतस्यमृत्युर्नजा
यते ॥ सत्यमेतत्समाख्यातंतवस्नेहेनपुत्रकः ८० शृणुस्वाद्गुह्यतरंसारंसाधकार्थम
नुत्तमं ॥ पलाशबीजचूर्णंतुप्रथमेचैवगृह्यते ८१ श्रावणेवाभाद्रपदेद्विगुणस्यपंचे
त्यथः ॥ विश्रामस्तदिनमेकंतुसज्जातंचभवेदपि ८२ दधिमंथप्रयत्नेननवनीतंचगृह्य
ते ॥ समुद्धृत्यचयत्नेनयवान्नसहिताशनः ८३ भोजनंशालिभक्तेनगवांक्षीरेणसं
युतं ॥ सप्तैकंब्रह्मचूर्णेनवलीपलितवर्जितः ८४ श्रुतिस्तःसर्वतत्वोक्तोजीवेद्वर्षशत
त्रयं ॥ त्रयंततोभयांकुर्यात्त्रिसमत्रयमेवच ८५ गोक्षीरशालिभुंजीस्यात्क्षीराम्ल

मपिवर्जयेत्।। सर्वेषामपियोगानामुक्तोभवतिकीर्तिनः ८५ सर्वेवृश्चिकहृष्टस्यवान
रादिकघोणसा।। सर्वेषांविषकारानांवानरीनश्यमेवच।। ८६।। स्थावरंजंगमंवापिकृ
त्रिमंचापियद्विषं।।अजीर्णंविविधंभूतंपुष्पंचसर्पिषासह ८७।। वायुवेगेविनश्यति
सर्वत्रविषनाशनं।।अथकल्पहरिद्राकल्पः।। आर्द्रस्युष्कंनिशाचूर्णंशुष्कभांडोदरे
स्थितं ८८ तन्नष्टमात्रस्तवेणगव्यपीतंविशोधनं।।सप्ताहंसेव्यमानस्पहन्यात्कुक्षि
गतान्गदान् ८९ उष्णोदकेनतत्पानात्सप्ताहंवीर्यवान्भवेत्।। शाल्यन्नंपयसा
श्नीयात् यद्वाआज्येननित्यशः ९० निष्कमात्रंनिशाचूर्णंमधुनासहलोलितं।। मासा
त्शशिककांतिःस्याद्द्विमासात्कमलप्रभः।।९१।। त्रिमासात्पितकारंचचतुर्मासेर्जुरादि
भिः।। विमुक्तःपंचमासात्स्यात्स्थिरयौवनवर्जितः।।९२।।षण्मासात्सूर्यसंकाशोस

समासात्मनोप्लवः।।अष्टमेस्यात्प्रसन्नात्माद्दूरश्रवणवान्नरः ९३ नवमासाद
नायासंस्त्रीशतंचाधिरोहति।।अनेकशास्त्रवेदीस्याद्दशमासनिषेवणात्।। ९४ मा
सादेकादशान्मर्त्यः सर्वज्ञत्वमवाप्नुयात्।।इदंतुवत्सरंयस्तुजरामरणवर्जितः ९५।।
सीराहारोभवेन्नित्यंहरिद्राचूर्णलोलुपः।। अथकटुरोहिणिकल्पः।। पुष्यार्केरोहि
णीचूर्णंवारिणासहसेवितं ९६ ज्वरंहरतिदुर्वारंभ्रमसंभ्रमकारकं।।पाठासमन्वि
ताकस्मित्तस्यालाभेचविपाचिता ९७ अष्टविशेषतद्वारंरात्रेःसर्वज्वरापहं।।प्रभात
कालेसंपीताविरेचनकरीस्मृता ९८ पिष्ट्वाश्वत्थत्वचाकांस्येलेपाद्दाहज्वरंहरेत् ९९
तन्मूलमंबुनापीतंसर्वज्वरहरंस्मृतं।। तच्चूर्णंस्यर्दुग्धेनभावितंसेवितंयदि १०० तो
लकंसेवितंचैकंमात्रांचिवरीकृतं।।द्वितीयकज्वरंहंतिचातुर्थिकमथापिवा १।। कोकि
केनसमायुक्तासमस्तविषनाशिनी।।वटवृक्षेणतन्मूलंकंठस्थंज्वरनाशकृत्।। २।।

शिवावीरजटाकंदमूलंसंवेष्टयतंतुना॥ सागरेणगलेबध्वासर्वरोगनिवारिणी॥३॥
॥ ॥अथाश्वगंधाकल्पः॥ अश्वगंधारय श्लक्ष्णंपयसासहसेवितं॥निर्गुणस्यो
र्ध्वनाच्चूर्णंगुडंचसहसंमितं॥४॥ कर्षमात्रंभवेन्नित्यंसर्वामयविशोधनं॥धात्री
रसेनतच्चूर्णंकर्षंपिष्ट्वापिसेवितं॥५॥ दिव्यदृष्टिर्भवेज्जंतुर्जरामरणवर्जितः॥निष्क
मात्रेंहितंदीजंगर्भन्व्याचभवेत्रजः॥६॥ द्विनिष्कमात्रयुक्तोपिसायमुष्णेनवारिणा
पीतंजयतिदुर्वारंनोनाविधंज्वरादिकं॥७॥ तच्चूर्णंनवनीतेनसेवितंरोमजादिकं॥
तच्चूर्णंतैललेपेनप्रणश्यंतित्वगामया॥८॥ पलार्धमस्यचूर्णस्यतिलंनद्विगुणंततः॥कुं
डवेमापजंचूर्णंमेदद्राज्येनपाचितं॥९॥ अपूपास्तस्येल्लिखित्वंमासंनिदाघेनजरांजये
त्॥श्वेनाश्वगंधमूलेननरस्यार्द्धंधेकृतेसति॥१०॥ दुर्बलोपिमहाभारंवहेदक्लिष्टचेतनः
भक्षोनमांगपरिकल्पितनामधेयंतस्यपत्रपुष्पफलदंडसमूलचूर्णं॥तत्कारनालपय

सामधुवारिणाज्यंषण्मासंसेतनरोजरामरत्वं॥११॥ अथांकोलकल्पः॥ ॥
सितारुणहरिद्वर्णैर्रतैरेवचतुर्विधैः॥अंकोलगुरुरुहल स्यमूलंपूर्वदिगाश्रितं॥१२
कर्षरमधुनालोड्यनेत्रयोरंजतंयदि॥दिवावसानेतनुतेनष्टद्रव्यावलोकनं॥१३ एकवि
शहिंनंतस्यबीजंक्षौद्रसमंवितं॥भजंतंमानसंदृष्ट्वासद्यःसर्पोमृतंनयेत्॥१४॥त
द्बीजचूर्णंमधुनापक्षंचंद्रनिवातरे॥एकोपिसेवतेमर्त्योजिरामुक्तोयुवाभवेत्॥१५॥
तत्तैलमर्दितंसूतंघटकंदमवाप्नुयात्॥तन्निष्कमात्रंविन्यस्तंताम्रमत्कनकंभवेत्॥१६
कृष्णांकोलोद्यबीजानिचूर्णंचूर्णेनमाहृतं॥श्लक्ष्णेनोत्तमकंटंचभाजनांतंप्रलेपये
त्॥१७॥तद्बृत्तोभाजनंनीत्वान्यसिपेद्भानुसंनिधौ॥तेनतस्तौरितंतैलंआदायांबु
जंतुभिः॥१८ लुभवर्त्यायुतंचैवरूपेनधृतकज्जलं॥तत्कज्जलांजनंनेत्रेअदृश्यकर
णंभवेत्॥१९॥ अरुणांकोलबीजस्यतैलपूर्ववदाहृतं॥तेनप्रलिप्तताम्रस्यपत्राणि

पुटपाकयोः ॥२०॥ कालिकागंधनिर्मुक्तो निष्कमात्र सितासिता ॥ त्रिनिष्कमात्रस्वर्णेन
स्वयं कनकतां व्रजेत् २१ ॥ विमर्द्य पारदं तेन मुखायामधरो नरं ॥ पुटीकृतं भवेन्नेन बं
धतेस्स क्षणात् ॥२२॥ अथ शाल्मलीकल्पः ॥ सितासितारुणा हारिद्वर्णेन चतु
र्विधा ॥ वर्णन्याममलशाल्मल्यास्त्रि लोहपरिवेष्टितं ॥२३॥ पात्रांतरगतं कुर्याद्दृष्टस्य
करणं ध्रुवं ॥ तन्मूलवल्कलं तैलं सितया सह सेवितं २४ सप्ताहं तेन संसिद्धः षोडश
वा पुरुषो भवेत् ॥ अनेकनारीरमणो दीर्घजीवी स्मरोपमः ॥ २५ ॥ तद्दृस्सरं धेनिक्षिप्य
सरं धालोहनालकं ॥ विन्यस्य भांडे तस्याधो दहेत्पुटगजाग्निना ॥२६॥ तन्निःसृतं
हानिरसं मंडलं मधुना भवेत् ॥ अनेककामरूपी स्यान्नानारूपं प्रविश्यति २७ अद
श्यत्वं स्वयं प्राप्य देवानां पुरतो पिवा ॥ तद्रसेन द्रुतं तारं कुरु स्वर्णं भवाप्नुयात् २८ ॥
त्रिवारं तद्रसालिप्तं तत्पुष्पसमसं भिनं ॥ नीलीरसेन नेत्रस्थं अदृश्यं कुरुते नरं ॥२९॥

तत्पुष्पं भृंगराजाभ्यां तैलमुत्पलकंदजं ॥ पाचितं स्वशरीरे मे केशपादविलेपितं ३०
समाहात्पलितं हंति कपालतलिरंजनं ॥ मूलेन श्वेतशाल्मल्याः कर्पूरहिममाक्षिकं ३१
मधुनां नेत्रयोर्न्यस्ताकदलीपत्रवेष्टकान् ॥ नष्टद्रव्यं निधानं वा भूगतं तेन पश्यति ३२
पुटं कृत्वा प्रयत्नेन यथापूर्वं मृषीरतं ॥ तस्मिन्निःसृततैलेन पलं सूतस्य मर्दितं ३३ ॥
लवंगं तुलया सोर्धं वंगं समतिसंश्रुतं ॥ ससितं तद्रवं मूलं पयसा सह सेवितं ॥ ३४ ॥ अ
नेकनारीरमणं करोति स्मरसंनिभं ॥ तन्मूलं वाजिगंधाभ्यां युताभ्यां माषशर्करा ३५
घृतेन शोभितां भूपाने कविंशद्दिने भवेत् ॥ नवनागबली श्रीमान् अम्लक्षारमसेवयेत्
३६ ॥ प्रगल्भकामिनीकंदं मदनिर्मथनक्षमः ॥ हरितायाश्च शाल्मल्याः पूर्ववत्तैलमा
हरेत् ३७ विद्रुतं रजतं तेन मापीतं स्वर्णतां व्रजेत् ॥ आज्येन पीतं तत्तैलं दिव्यदेही भवे
न्नरः ३८ तत्तैलं क्षौद्रसंयुक्तं सर्वरोगहरं तृणां ॥ आगछत्यलगंधस्यात्कनकद्युतिभा

स्करः॥तत्पुष्पस्यरसंपीतंबालार्ककरसंन्निभं॥कलाभिर्निखिलाभिश्चनतत्पूर्णःस
मगोभवेत्॥४०॥अनेककालजीवीस्याद्रमतेचयथास्करः॥आदायारुणशाल्मल्यास्त
रुण्याप्रिभवंसरं॥४१॥सिताक्षौद्ररसंपीतंकुर्याद्वज्रनिभंवपुः॥श्वेतवज्ञलमाहृत्यसक्षौ
द्रेतेनभाविनं॥४२॥मृतानिरूढोभवतिपतिताःपुनरुत्थिताः॥पुष्पार्कमधुनातस्याभस्म
नजनितंरजः४३आज्येनसेवनंकुर्यात्कलेनदत्यराक्रमं॥यःकोपिसेवतेनित्यंशाल्म
लीकल्पमुत्तमं४४तस्यनश्यतिदारिद्र्यंजरामरणवर्जितं॥ अथकाकजंघाकल्पः॥
काकजंघासमूलाग्रांपुष्पेसम्यक्समाहरेत्॥४५॥सिताश्वपुंखामूलेनसघृतंतन्द्र
संरजः॥षण्माससेवितंकर्षंसर्वशस्त्रनिवारणं॥४६॥यावत्विण्मूत्रसंस्तंभस्ताव
च्छायाममेववा॥क्षीरेणपीतंतच्चूर्णंवज्रकायंकरोतिहि॥४७॥मंडलंसेवयेद्यस्तु
वृद्धोपितरुणोभवेत्॥तच्चूर्णमीश्वरीमूलंगोधूमोघृतवेष्टितं॥४८॥परलोयंकरोत्य

वृदिनेनैकेनमानवः॥सोयंवज्रशरीरस्याद्दृष्ट्वाम्युत्हरिवापरः॥४९॥ अथकरकक
ल्पः॥ ॥करकइतिउदकपानी॥ करकद्रुमपंचांगंसितयासहसेवितं॥शरीरगतरो
गघ्नंमधुनाहारसेवितं॥ कारितानजराचूर्णंक्षयापस्मारसेवितं॥नस्योत्तरगतंमू
लंसितादुग्धेनपुष्टिकृत्॥५०॥सितेतरसिलोद्भूततन्मूलंरजसासह॥सेवितंत्वनि
हत्याशुपांडुरोगंस्कंदुस्तरं५१॥गवांतरेणतन्मूत्रंचूर्णंमाज्येनसेवितं॥मंडलंप्र
मुखान्कुष्ठदुष्टरोगव्रणंजयेत्५२तैलेनतस्यपंचांगंचूर्णसम्यग्व्रणापहं॥क्षीरेण
पीतंतच्चूर्णंकरकेजननस्मृतं॥५४सितांबुस्पर्शनात्तस्यवेगःशीघ्रंनिरुध्यते॥वेता
लस्मरकोदंडमार्तंडग्रहनाशनं५५॥ ॥अथनिर्गुंडीकल्पः॥निर्गुंडीमूलचूर्णंतु
गवांसर्पिःपलाष्टकं॥घृतंचैवतथाक्षौद्रंषोडशंक्षीरकंतथा ५६स्निग्धभांडेसमा
लोड्यधान्यराशौनिधापयेत्॥पूर्णेमासेततोद्धृत्यसुदिनेपुष्पसंयुतं॥५७॥बिडाल

पदिकामात्रंमासमेकंप्रयोजयेत्॥ वलीपलितनिर्मुक्तोजीवेद्वर्षशतत्रयं ५८ निर्गुं
डीमूलमादायतक्रेणसहसेवितं॥ मासमेकप्रयोगेणवलीपलितवर्जितः॥ ५९ निर्गुंडी
मूलमादायअजामूत्रेणयःपिबेत्॥ नखादंताश्चकेशाश्चसमराविंपतंतिच॥ ६०॥
मासैकेनप्रयोगेणनाग्निनादह्यतेनरः॥ तस्यमूत्रपुरीषेणशुल्वंभवतिकांचनं ६१
निर्गुंडीमूलमादायघृतेनसहभक्षयेत्॥ मासैकेनप्रयोगेणनरोराकाशगामिनः ६२
निर्गुंडीमूलमादायतिलतैलेनभक्षयेत्॥ अस्थिगतानिकुष्ठानिनाशयेदेकमासतः
६३॥ पुष्पार्केग्रासंहयेत्प्रातर्निर्गुंडिजांत्वचांशुभां॥ शुष्कीकृत्वाविचूर्णपीयकर्ष
कर्षंपिबेत्सदा ६४॥ अजामूत्रप्रयोगेणषण्मासादमरोभवेत्॥ वर्षमात्रप्रयोगे
णशिवतुल्योभवेन्नरः॥ ६५॥ तच्चूर्णार्धमिदंचाज्येलिहेत्स्यात्पूर्ववत्फलं॥ तच्चूर्णं १२

त्रिफलामुंडीभृंगीनिवगुडूचिका॥ ६६॥ वचाशेषसमंचूर्णंमध्वाज्याभ्यांलिहेत्फलं॥
गुडपक्कमापन्नंपीत्वाचांतिविरेचकृत्॥ ६७॥ निर्यातक्रेमशस्तस्थमुखदंता
कर्णजः॥ राजयक्ष्मादिरोगाश्चसमहेनविनाशयेत्॥ ६८॥ मासत्रयाज्जराहंतिजी
वेद्वर्षशतत्रयं॥ अथभक्षणमंत्रः॥ ॐमायात्मगणपतयेकुरुस्वाहा॥ इतिभक्ष
णमंत्रः॥ निर्गुंडीमूलमाहृत्यछायाशुष्कंविचूर्णितं॥ सप्ताहंगोजलेनोक्तंहंतिसर्वं
त्वचामयं ६९॥ अजामूत्रेणसंपीत्वासप्ताहंतरुणरजः॥ नखकेशाश्छिन्नानित्वच्चं
तिविनश्यंतिहि ७० पुनःसप्तदिनादूर्ध्वंदिव्यदेहोभवेन्नरः॥ वह्नितोयभयंनास्ति
पुनःसप्ताहमेवया ७१ हस्तार्कस्येंदुवारस्यमूलेचोद्धृगतंहरेत्॥ स्पर्शेनबंधविधे
हकुरुतेशीघ्रमद्भुतं॥ ७२॥ अथैंद्रवारुणीकल्पः॥ इंद्रवारुणिकामूलंकांजिकेन

निषेवितं॥ स्थावरं जंगमं हन्यात् विषभूत ग्रहादिकं॥ ७३॥ बिल्वपत्र युतं तस्य नतहर्टू
विमोचनं॥ तज्जलं पयसा पीतं वंध्यापुत्र प्रदं जगुः॥ ७४॥ इंद्रवारुणिकामूलं पुष्येलग्ने
समुद्धरेत्॥ कालत्रयेगवांक्षीरैः पिष्ट्वानद्दोलकीकृतं॥ ७५॥ चंदनेन समायुक्तं छाया
शुष्कं तु कारयेत्॥ ललाटे तिलकं कृत्वा नृणां वश्यकरं परं ७६ त्र्यूषणं च गवां क्षीरैः पत्त्रा
कुर्यात्तदीहृदं॥ छायाशुष्कां स्थितां वग्त्रेवीर्यस्तंभकरं नृणां ७७॥ अथ भृंगराजक
ल्पः॥ पुष्पयोगेन संग्राह्य भृंगराजस्य मूलकं॥ आतपे शोषयित्वा तु सूक्ष्मचूर्णं तु
कारयेत् ७८ आरनाले समालोड्य पुष्पार्केणतु सेवयेत्॥ बिडालपदिमात्रं तु परिहा
रो न विद्यते॥ ७९॥ तैलान्वितं वालिह्य तु जरसा नाभिभूयते॥ एकमासप्रयोगेण
सर्वरोगाणि नाशयेत्॥ ८०॥ ततो मास द्विती येन सर्व शृतिधरो भवेत्॥ चतुर्मास

प्रयोगेण किन्नरैः सह गायते॥ ८१ पंचमे काव्यकर्त्ता च षष्टे काककृतिर्भवेत्॥ स
प्तपरिवर्त्तेते न नख वा केशाः पुनर्भवेत् ८२ नवमासप्रयोगेण सर्वभूतानि पश्यति॥
दशमास प्रयोगेण जीवेद्वर्षशतत्रयं ८३॥ संप्रयोगेण कलशः जीवेद्वर्षशतत्रयं॥ संव
त्सरप्रयोगेण सहस्रायुर्भवेन्नरः ८४॥ कूश्मांड कारवल्लीच धानकं सर्षपं तथा॥ वर्ज
येद्बुद्धिमान्सर्वं सेव्यमानो रसायने ८५॥ नद्वसं त्रिफलाचूर्णं भावितं पलितापहं॥ त्रि
पक्षमात्रं जंतूनां नात्र कार्या विचारणा ८६॥ काकमाचीरसे भृंग रसेन सह भावितात्॥
द्वादशाहाद्भवेज्जंतोः पलितस्तंभनं परं ८७॥ अथ त्रिफलाकल्पः॥ त्रिनिष्कमात्रा
अभयाप ण्मितं च विभीतकं॥ धात्री द्वादशनिष्कास्या त्रिफलासूक्ष्मचूर्णितं॥ ८८॥
चूर्णं विडंगखदिर भृंगराजभवांबुभिः॥ पलेन तत्समभाव्यं मासमात्र निषेवणात् ८९

वलीपलितनिर्मुक्तः षण्मासाद्दिव्यदेहता ॥ इतिसंवत्सराभ्यासात्सहस्रायुर्भवेन्नरः
९०॥ अथान्यच्च ॥ हरीतक्यास्त्रयोभागाधात्र्याद्वादशभागकाः ॥ षड्भागाश्च विभीत
स्यत्रिफलैकंप्रकीर्तिता: ९१॥ खदिरस्याभयःसप्तरात्रंभृंगरसेनवा ॥ विडंगपयसा
सप्तसप्तब्रह्मरसेनवा ९२ त्रिफलाभावयेदित्थंभक्षयेच्छर्करासमं ॥ वलीपलितनि
र्मुक्तः सर्वरोगैःप्रमुच्यते ९३॥ ॥अथमुसलीकल्पः॥ सौद्रेणमुसलीकंदंसेवितं
ज्वरनाशिनी ॥ गोमूत्रेणज्वरस्तस्यसंततज्वरवेगनुत् ॥ ९४॥ उष्णोदकेनतच्चूर्णंशूल
घ्नंशांतिसेवितं ॥ जंबूरसेनसंपीतंमुसलीकमलापहं ९५॥ नद्रजः कांजिकापीतंसद्यः
कुक्षिरुजापहं ॥ तृतीयंचज्वरंहन्यात्कदलीवारिणारजः ९६ क्षीरेणपीताम्रहन्या
द्देहोत्थकृच्छ्रकायच्च ॥ अपामार्गमुनापीताबातशांतिंप्रयच्छति ॥ ९७॥ घृतेनस १४

२७

सहितंतस्याच्चूर्णंवीर्यविवर्द्धनं ॥ नारिकेलांबुनापीतंशिरोविस्फूर्तिनाशनं ९८ तिल
तैलेनतच्चूर्णंहन्याद्घुष्मसुतान्गदान् ॥ दुबनस्यरसापीठंपांडुरोजेयस्फदरा ९९॥ स्मर
णेपोषवंतस्यरुजान्हन्यात्क्षुदामयं ॥ आर्द्रकस्यरसंपीतंतच्चूर्णंशूलवेगजित् ॥ १००॥
कवचंफलसारेणजलोदरगदंजयेत् ॥ तच्चूर्णंसैंधवोपेतंदुष्टव्रणशोषणं ॥ १॥ जी
र्णज्वरगतान्रोगान्पिप्पलीसहिताहरेत् ॥ लक्ष्मणामूलसंयुक्ताऋतुस्नातापि
वेद्यदि २॥ कामिनीकदलीकंदंवंध्यापिलभतेसुतं ॥ सवचाकल्कलाकुर्यात्स्थूलंवा
चस्पतिर्यथा ३॥ भृंगराजरसोपेताद्दुष्टमारुतनाशिनी ॥ सेवितामूशिरीषेणज
रामरणनाशिनी ॥ ४॥ तक्रेणालोड्यसंपीतापांडुव्याधिनिराकरी ॥ निर्गुंडीसारस
हितावज्रकायप्रदायिनी ५॥ अजामूत्रेणसंपीतावलीपलितवारणं ॥ नारिकेलांबु

२८

नापीता मुसल्ली विषनाशिनी ६॥ कालदष्टमधो हन्यात्पटोलेन युता यदि॥ मातुलिं
गरसोपेतं तद्रजः कुक्षिरोगजित्॥७॥ मूलं तस्याः समुद्धृत्य छायाशुष्कं सुचूर्णितं
॥ मधुसर्पिर्युतं भुक्तं देहशुद्धौ शुभे दिने॥८॥ जीर्णे क्षीणे रसे भोक्तव्यं वातुलानि विवर्ज
येत्॥ वलीपलितनिर्मुक्तो मासयोगेन मानवः ९॥ घृतेन मधुना भुक्ता सर्वकुष्ठविना
शिनी॥ स्वर्णपुष्पी तथा गोरी नाराची कुष्ठशोषिणी १० एतैः खर्जूरपत्राख्यैर्मंडली
नाम कीर्तिता॥ अथ मुंडीकल्पः॥ करास्फैस्तु समाना मुंडी त्रिविधा स्मृता॥ सि
तारक्ता सिता चेति सत्वराजसतामसैः ११ गुणैरेतैः क्रमाद्ध्याप्तां कथयामास तं शि
वे॥ शुक्लपक्षे च पंचम्यां पौर्णमास्यां समाहितः १२॥ रेवती रोहिणी पुष्य श्रवणार्के
द्विजैस्तथा॥ अभ्यर्च्य गंधपुष्पाद्यैः समूलां तां समाहरेत् १३॥ तच्चूर्णसेवनात्सप्त १५

रात्रौ शरीरवान्भवेत्॥ द्विसप्तदिवसं सेव्यान्नमरत्वमवाप्नुयात्॥१४॥ छायाशु
ष्कं च तच्चूर्णं कर्षं गोमयेपसासह॥ वर्षैकेन रुजं हंति जीवेद्वर्षशतत्रयं १५॥ ॐ न
मो भगवते अमृतोद्भवाय अमृतं कुरु कुरु स्वाहा॥ ॥ भिक्षोन्न मांगपरिकल्पित
नामधेयस्तत्पत्रपुष्पफलदंडसमूलचूर्णं॥ तक्रारनालपयसा मधुवारिणा
ज्येः षण्मास सेवितनरैस्तु मरामरत्वं १६॥ अथ चित्रककल्पः॥ धन्वंतरिरुवा
च॥ अथातः संप्रवक्ष्यामि चित्रकं कल्पमुत्तमं॥ यस्य भक्षणमात्रेण जरामृत्युवि
नाशनं १७॥ नास्ति तेन समं किंचित्पृथिव्यां स्थलमंडले॥ त्रिविधं चित्रकं वर्ज्यं कृमि
क्षीपरिपीडितं १८ ग्रामांते वा श्मशाने वा वल्मीके वा चतुष्पथे॥ समीपे वाग्रदे
द्वारे चित्रकं वर्द्धयेत्सदा १९॥ सूचिपत्रमुखस्त्रैषं तथा मंडलपत्रकं॥ उभे ति पत्र

कंग्राह्यंस्कचिमंडलपत्रके २० ॥ कार्तिक्यां मार्गशीर्षेवा उद्धरेत्तु विचक्षणः ॥ गजायुत
सहस्राणां वेदगम्भुतिधरो भवेत् ॥ २१ ॥ द्विकमासप्रयोगेण दृढकायो जितेंद्रियः ॥
चित्रकंमासमेकंतु तक्रेणसह यः पिबेत् ॥ २२ ॥ नश्यंतिव्याधयः सर्वे कामदेवोपमो
भवेत् ॥ क्षीरेण मासमेकंतु चित्रकंभक्षयेन्नरः ॥ २३ ॥ वज्रदेही महाकायो महाबल
पराक्रमः ॥ योगरत्नावल्यां ॥ समूलपत्रमुत्पाद्य छायाशुष्कंतु कारयेत् ॥ क
टुत्रयेण संयुक्तं घृतेन मधुनासह ॥ २४ ॥ चित्रकं भक्षयेत्प्राज्ञो बिडालपरमात्रकं
षण्मासयोगतो मानी वलीपलितवर्जितः ॥ २५ पांडुरोगमथ स्मारं जलोदरभगं
दरं ॥ आशीर्षिमेहनं कुष्टं हंति वह्निनिषेवणात् ॥ २६ ॥ चित्रकंमासमेकंतु गोमू
त्रेणतु यः पिबेत् ॥ समस्तव्याधिशमनं रूपवांश्च वमंशयः ॥ २७ ॥ चित्रकंमास

मेकंतु मधुनासह यः पिबेत् ॥ मेधावी सर्वसंपन्नः सत्यवाक्प्रियदर्शनः ॥ २८ ॥
जीवेद्वर्षशतं साग्रं वलीपलितवर्जितं ॥ एतत्तु कथितं ब्रह्मन् चित्रकाख्यं रसायनं ॥
२९ ॥ अहोरात्रोषितो भूत्वा पूजां कृत्वा विधानतः ॥ रक्तांबरधरो मौनी रक्तगंधानु
लेपनः ३० ॥ रक्तमाल्यान्नरक्तो सौ बलिं दद्याद्विचक्षणः ॥ कृष्णाष्टम्यां चतुर्दश्यां
त्वाष्ट्रंऋक्षे चैवं च मौ ३१ चंद्रताराबलं चैव मंत्रेणानेन मंत्रवित् ॥ ॐ छिंधि चित्रा
य स्वाहा ॥ अनेनैव तु मंत्रेण गंधमाल्यानुलेपनं ३२ ॥ बलिं दद्यात्तु नर्मंत्रं मंत्रा
मेवमुदारयेत् ॥ ॐ सत्यवती त्रिभुमहौषधे मान्चलः ॥ समय हुं फट् स्वाहा ॥ स
मूलपत्रमुत्पाद्य छायाशुष्कंतु कारयेत् ॥ ३३ ॥ सूक्ष्मचूर्णं ततः कृत्वा घृतेनम
धुनासह ॥ कटुत्रयसमायुक्तं बिडालपरमात्रकं ॥ ३४ ॥ समाहं भक्षयेत्प्राज्ञः सौ

रसो वा जितेंद्रियः ॥ वर्षपंचशतं जीवी वलीपलितवर्जितः ॥ ३५ ॥ संवत्सरप्रयोगेण
सहस्रायुर्भवेन्नरः ॥ मप्रदाशतगामी स्याद् क्षीणबलयौवनः ॥ ३६ ॥ द्विरष्टवर्ष
कायो सौ कंदर्पसरूपवान् ॥ तनुं सिंहवलोपेतां धनेशश्रवणोपमः ॥ ३७ ॥ सत
तं भस्मयेद्यस्तु सरुद्रोरविसंजवत् ॥ जरामृत्युविनिर्मुक्तो क्रिकंस्यप्रभावतः ॥
३८ ॥ रक्तचित्रकचूर्णेन नस्यं दद्यात्त्रिभिस्त्रिभिः ॥ सर्वदोषविनिर्मुक्तः स्तंभ
माप्याति तत्क्षणात् ॥ ३९ ॥ रक्तचित्रकभल्लाततैलं लिप्तं पुटेन तु ॥ चित्रार्कपत्रं
देवेपिज्ञायते हेमसेवनं ४० अथ मंडूककल्पः ॥ महानद्यां समुद्रे वा देवखाते
महाह्रदे ॥ दशपुरुषमधस्तान्मंडूकानां वसेत् द्वयं ॥ ४१ ॥ सर्ववर्णोअतिस्थूले
दीर्घजीवी बिलेशयः । शरत्काले तु निर्गत्य वसेदन्यत्र सर्वदा ४२ ॥ तस्य मूर्ध्नि महा १७

रत्नं विषनाशनकीर्तितं ॥ एतत्संगृह्य तं नृणां नास्ति मृत्युदरिद्रता ४३
यत्र कोशेषु विद्रुलं तत्र सर्पो न तिष्ठति ॥ तत्स्पृष्टोदकसंसेका नश्यंति दश धा विषं ४४
वातगुल्मोदराजीर्णश्वनेत्रशूलादिकं रुजं ॥ नश्यति स्पर्शमात्रेण स्पृष्टान्नं तैलसे
वनात् ॥ ४५ ॥ अथ श्रीफलकल्पः ॥ बिल्वबीजानि संगृह्य सूक्ष्मचूर्णानि कारयेत्
त्रिफलाक्वाथयुक्तेन सप्तवाराणि भावयेत् ॥ ४६ ॥ ततो यंत्रेण निष्पीड्य तैलं गृह्य सुसंय
तः ॥ स्निग्धभांडे विनिक्षिप्य धान्यमध्ये तु निधापयेत् ॥ ४७ ॥ मासमेकं ततो धृत्य रक्षां कुर्या
द्विधानतः ॥ विरेचवमनं कृत्वा शुद्धे काष्ठेषु भद्रदिने ॥ ४८ ॥ कृष्णाष्टम्यां चतुर्दश्यां पुष्य
योगेन बुद्धिमान् ॥ निवासमंदिरे तैलं कर्षमात्रं पिबेन्नरः ॥ ४९ ॥ जीर्णे तु भोजनं कुर्या
च्छाल्योदनं पयोयुतं ॥ दिवसेकेन मेधावी बाधिर्यध्वंसविनाशनं ॥ ५० ॥ द्विदिनेन विन

श्यंतिसर्वरोगानसंशयः॥ चतुर्थेदिवसेग्रंथसहस्त्राणिचधारयेत्॥ ५१॥ पंचमेदि
वसेचैवतथासारस्वतोभवेत्॥ षष्ठेचदिवसेप्राज्ञोब्रह्मतुल्योभवेन्नरः ५२॥ सप्तमेदि
वसेचैव सर्वज्ञःप्रियदर्शनः॥ श्रुतिज्ञःस्फगेशम्श्रीमान् कर्णिकारसमद्युति ५३॥ व
लीपलितनिर्मुक्तोजीवेद्वर्षसहस्रकं॥ सप्ताभिर्मंत्रितंकृत्वापश्चात्तैलंपिबेन्नरः॥ ५४
मंत्रः ॐनमोवीरहजानिनीस्वाहा॥ अथलांगुलीयोवत्सनागलीकल्पः॥ अथातःसं
प्रवक्ष्यामिलांगुली कल्पमुत्तमं॥ लांगुलीनामविख्याताओषधीचोत्तमोत्तमा॥ ५५॥
तस्यामूलंतुसंग्राह्यगंधकंचतथैवच॥ रसेनसहितंचैवताम्रपत्राणिलेपयेत्॥ ५६॥ सु
खप्रसवनंकुर्यात्प्रशस्तमिदमौषधं॥ जलेनलांगुलीकंदंपिष्ट्वाहस्तेप्रलेपयेत्॥ ५७॥
हस्तेनस्त्रीकरंस्पृष्ट्वाद्रवेद्वहिर्हितंयथा॥ सर्वेषांचैवयोगानांमंत्रराजंशिवोदितं॥ ५८॥
अष्टोत्तरशतंजप्त्वातयोगस्यसिद्धये॥ ॐनमोभगवतेउड्डामरेश्वरायस्त्रिणांभ

१८

गदर्पपातयस्वाहाहूंरःठःठः॥ करनलोल्पादिति॥ लांगुलीकदलिमसफलगात्रःपु
रुषभीमसेनादपिदर्पंहरति॥ अथदेवतालिकल्पः॥ देवदालीफलंक्षीरंमासमात्रं
मधुघृतं॥ अंगलेपेर्निकुष्ठमंलेपनाद्राक्षणंभवेत्॥ ५९॥ समूलफलमात्राणांसू
क्ष्मंचूर्णंविधायच॥ पिबेदुष्णेनतोयेनमात्रंमार्जारपादिकं ६०॥ प्लीहंभगंदरंवातंगुल्
मंकाहलमकुलं॥ हंतिगोमूत्रपीतच्चसर्वकुष्ठानिदेहिनां॥ ६१॥ देवदालीरसोगंधं
पाषाणेनसमान्वितं॥ द्रावयेत्सर्वलोहानिपारदस्यापिबंधकृत्॥ ६२॥ अथरक्तगु
ंजाकल्पः॥ पुष्पार्केणसमुद्धृत्यतन्मूलंतुविचक्षणः॥ ६३॥ सर्पदष्टस्तुलेपेननि
र्विषोभवतिक्षणात्॥ ६३॥ तन्मूलंतुमुखेक्षिप्यसंग्राममध्येविशेन्नरः॥ सदुष्टमु
खतस्तंभोमतिस्तंभचविद्यते ६४॥ तन्मूलंतुकटीबध्वामूढगर्भःप्रसूयते॥ तस्यमू
लंतुसंग्रह्यआत्मपंचमलेःसह॥ ६५॥ यस्यपानेनदीर्यतेसवश्योभवतिध्रुवं॥ तमेव

मूलं वहति फलंच मधुनासह ॥ ६६ ॥ लिंगस्य लेपनं कुर्यात् द्रावणं मोहनं वशं ॥ तन्
मूलं तु गले बध्वा कामिनां वशं करोति हि ६७ तन्मूललेपमात्रेण नाडीव्राण विशोधनं ॥
तस्य मूलं समुद्धृत्य आत्ममूत्रेण भावयेत् ६८ ॥ यस्यै प्रदीयते भोक्तुं सा वश्या भवति
ध्रुवं ॥ तन्मूलं तु करे बध्वा सर्वग्रहविनाशनं ६९ ॥ गुंजाफलं श्लक्ष्णा पिष्टं लेपयेत् काष्ठ
पादुकां ॥ विना विघ्नं नरो गच्छेत् क्रोशमेकं न संशयः ॥ ७० ॥ लघु दारुमयं पीठं गुंजापि
ष्टेन लेपयेत् ॥ प्युत्क्रमेत जलेशानमुपतिष्ठन्न मुच्यते ॥ ७१ ॥ गुंजाबीजं त्वचोन्मुक्तं
चूर्णं भाव्यं नमूत्रकैः ॥ समाहृतु पुनः कांस्यपात्रे घर्मे समुद्धरेत् ७२ तैलमादाय नलि
नं पूर्ववत् पादुकामति ॥ अस्तपत्ररसैः पिष्टं गुंजामूलं दिनाष्टके ॥ ७३ ॥ अंजिता सेनरः
पश्ये पिशाचानतिकौतुकं ॥ श्वेतगुंजारसे भ्वाहं सितसूत्रं विभावयेत् ॥ ७४ ॥ तत्स्व

36

१९

२

वर्तिकादीपं ततः संगृह्य कज्जलं ॥ तेनांजितो नरः श्चित्रं दिवा पश्यति तारकं ७५ मूलं
तु श्वेत गुंजाया कृत्से उत्तर भावयेत् ॥ उन्नेभिमुखी ग्राह्या बाणस्तंभ करं सुखं ॥ ७६ ॥ श्वेत
गुंजारसेनैव सर्वांगे लेपमाचरेत् ॥ अंगारराशि मध्यस्थो भ्राम्यमाणो न दह्यते ७७
मनुः ॥ ॐ वज्रकारिणे अमृतं कुरु स्वाहा ॥ मूलं तु श्वेतगुंजाया मंत्रयंत्र विनिक्षिपे
त् ॥ काष्ठमारे शतेनापि अन्नपाको न जायते ॥ ७८ ॥ मनुः ॥ ॐ नमो महामाये चकि
रक्ष स्वाहा ॥ मूलं तु श्वेतगुंजायाकुसुंभरसपेषितं ॥ तेनैव रंजयेद् वस्त्रं न दह्य स्त्रं स्वांग
वेष्टितं ॥ ७९ ॥ गंभीर जलमध्ये तु यावदिच्छति तिष्ठति ॥ जलस्तंभमिदं ख्यातं गुंजा
मंत्रेण मंत्रितं ॥ ८० ॐ नमो भगवते रुद्राय जलस्तंभय ठः ठः ठः ॥ पुष्यार्के श्वेतगु
ंजाया विधीना मूलमुद्धरेत् ॥ मुकाक्षिनारि संपिष्ट्वा मधुनासह चांजयेत् ॥ ८१ ॥ अं

38

जितास्तेनरस्तेननिधिंमश्यतितारकं॥ अथमंडूकब्राह्मीकल्पः॥ शुक्लपक्षेतुसंगृह्यपुष्य
नक्षत्रसंयुतं॥ समूलपत्रमुत्पाद्यस्तस्यचूर्णंतुकारयेत् ८२॥ सप्तरात्रप्रयोगेणकुष्टरो
गंविनाशयेत्॥ सप्तसप्तप्रयोगेणवज्रकायोभवेन्नरः ८३॥ सर्वरोगविनिर्मुक्तोकामदे
वस्वापरः॥ क्षीरेणपिवतेमासंसर्वरोगनिवारणं ८४॥ मासद्वयप्रयोगेणनिधानानितु
पश्यति॥ अदृश्यस्त्वत्रिभिर्मासैर्भवत्येवनसंशयः ८५॥ चतुर्मासेनपश्यंतिविमानान्
मराह्निनान्॥ षण्मासस्यप्रयोगेण खेचरत्वंचजायते॥ ८६॥ संवत्सरप्रयोगेणद्विती
यस्त्वशंकरः॥ अस्यैवस्यास्संयोज्यपिशाचाराक्षसादयः ८७॥ तस्यकर्मप्रयोगेणवंध्या
पुत्रवतीभवेत्॥ समूलपत्रांसंगृह्यमध्वाज्यैःसहभक्षयेत् ८८ जलोदरंतुवायावंतगु
ल्मशूलंमणश्यति॥ कुलंभैगंदरंश्वैवस्वासकाशजलापहं ८९ अथमंत्रः॥ ॐअमृ
तोद्भवायअमृतंकुरु॥ अनेनमंत्रेणाभिमंत्रयित्वाभक्षयेत्॥ मंडूकब्राह्मीसंगृह्यशुक्ल

पक्षेशुभेदिने॥ पंचमूलान्विताशोष्याछायायांकृतचूर्णकं ९०॥ अथबंदाककल्पः॥
संगृह्यकुमबंदाख्यंहस्तधारमायन॥ नारीनरेंद्रोवश्यस्यात्सर्वसंमोहकारकं ९१॥ वि
स्वाधोसमुद्धृत्यबंदाकराजवश्यकं॥ धारयेन्नचगेहस्तेवैश्वानरभयंभयं ९२ रोहि
ण्यांवटबंदाकंकरस्थंवीर्यवर्धनं॥ अश्वत्थभवबंदाकंरेवत्यांरोगनाशनं ९३॥ निर्गु
ण्डीभवबंदाकंभरण्यांपातमाश्रुतः॥ क्षीरेणसहतत्सद्योबुद्धिकरंपरं॥ ९४ सौम्यकें
भूतबंदाकंमशोषजनमोहनं॥ विषवृक्षस्यबंदाकंपूर्वाषाढाऋक्षंयदि ९५॥ मलिम
ननेभूपविषादादिमभाषणं॥ उत्तराषाढनक्षत्रेबंदकंविषवृक्षजं ९६ शल्लिकानहृतं
कुर्यात्हस्तेकृत्वाथधारणं॥ मधुकवृक्षबंदाकंधान्यस्थंधान्यवृद्धिदं ९७॥ पलाशत
रुबंदाकंनित्यंक्षीरेणसेवितं॥ अंकोलभवबंदाकंधान्यस्थंधान्यवृद्धिदं॥ ९८॥ म

ग्रस्थनाशनंकुर्यात्धूमकेतुरिवापरः॥वश्यार्थंबिंबवंदाकंगृहांतरगतंयदि९९वश्यं
करोतिसाम्राज्यंमानकमरणांतकं॥बदरीवृक्षवंदाकंकुष्टजित्क्षारसेवितं१००धात्रीवृ
क्षरुहोद्भूतंवंदाकंबाहुपाशगं॥जहत्यहर्निशंकालेकलिनिर्मूलकारणं१॥आशामारवि
वंदाकंधृतंजयतिहस्तगं॥चित्रवृक्षमूलजवंदाकंकुसुमास्त्रेणसर्वजित्२॥जंबूवंदाकं
जंचूर्णंतक्रेणपीतंविषंहरेत्॥हस्तगंचजयेद्युद्धंकलहेचविशेषतः३॥पुष्येतिंदुकवंदाकंमा
रायाधवनांतरे॥क्षिप्तंतदसिधाराहिहस्तिभयत्यंगपाननी॥४॥उत्तरादिकशाम्याकवंदा
दिमपिमूलकं॥आदायस्थितयेस्थितंसिसंपाकगृहेपरे॥५॥अवश्यंकुरुतेमर्त्यंयाव
ज्जीवमिदंभवेत्॥६॥अथबाकूचीकल्पः॥बाकूचीत्रिफलाव्यूषकृशानुचिरबिल्वकं॥
निंबवंदाकसहितंसमंगोमूत्रपेषितं॥७॥आशादशविधंकुष्टंनिर्मूलयतितत्क्षणात्॥

बाकूचीत्रिफलानित्रिकैःसार्धंहिंगुसिंदूरपारदैः॥८॥उष्णोदकेनसंपीतंसर्वकुष्ठापहं
जरगुः॥तच्चूर्णंव्योषदेवद्रुसितारत्नमिवानलः॥९॥उष्णोदकेषुतच्चूर्णंसव्योषंशूलवेगजि
त्॥सगुडंबाकुच्याचूर्णंसेवितंवातनाशनं१०॥ ॥अथरुदंतीकल्पः॥रुदंतीचजरात्यं
जरव्याक्षतरतीफलः॥मथिवविद्यमानायांकथंक्लिश्यंतिजंतवः११॥रुदंतीनामविख्याता
जराव्याधिविनाशिनी॥चणपत्रोपमैःपत्रैर्युक्तांभोबिंदुवर्षिणी१२॥चतुर्विधाचसाज्ञेया
पीतारक्तासितासिता॥तामौषधींसमासाद्यशुक्लपक्षेशुभेदिने१३छायाशुष्कांचतां
कृत्वाभयेस्तेन्नियतेंद्रियः॥विरेचभवनंकृत्वाबिडालपदमात्रया॥१४॥भक्षयेन्मधुस
र्पिभ्यांमासमेकंमहौषधं॥जीर्णेतेभोजनंकुर्याद्दुग्धभक्तंनरोजयी॥१५॥दृढकायो
नितेजस्वीसर्वरोगैःप्रमुच्यते॥वलीपलितनिर्मुक्तोपरमायुस्ततोभवेत्॥१६॥सूक्ष्म
चूर्णंततःकृत्वास्थापयेत्कटुतुंबके॥कर्षमात्रप्रमाणेनपथ्यभोजीशुभेदिने॥१७॥मधु

सर्पिः समालोड्य कृत्वा गोक्षीर भोजनं ॥ षण्मासस्य प्रयोगेण वज्रकायो भवेन्नरः ॥१८॥
पंचांग भक्षयेद्यस्तु सर्वरोगं निवारयेत् ॥ विडालपद मात्रं तु मधु सर्पि समन्वितं ॥१९॥ जी
वेद् वर्षशतं पंच वलीपलित वर्जितं ॥ पानेलेपेन धानस्यौषि धं हंति च भक्षणात् ॥२०॥ रुद्रं
तामूलस्य चूर्णं तु विडं संवत्सरं विषं ॥ टंकणं तगरं कुष्ठं लेहु नाद्रावणं परं ॥२१॥ मूलं सर्वेन
गंतायं भावयेच्च पयेछया ॥ अथ पालेयकल्पः ॥ एरंडसदृशैः पत्रैः फलैः श्रीवेव तु तादृशैः
॥२२॥ तस्य योगं प्रवक्ष्यामि सर्वसंशयनाशनं ॥ तस्य पत्ररसं गृह्य पारदाभ्रकमिश्रितं
२३॥ एकरात्रं मर्दयेद्देवि पिंडी भवति तत्क्षणात् ॥ धाम्यमाने जलस्थेन वद्धो भवति सूतकः
२४॥ तस्य कंदं समादाय कृत्वा खंडानि पाचयेत् ॥ यामैकं माहिषक्षीरे छायायां शोषये
त्ततः २५ कर्षैकं भक्षयेन्नित्यं स्कंत्पिपासा हरं भवेत् ॥ सिद्धयोग मिदं स्यात् पुरा नागा
र्जुनोदितं २६॥ अथ मंत्रः ॥ ॐ नमो भगवते अमृतार्णवमध्यासंस्थिताय मम शरी

 २२

रे अमृतं कुरु स्वाहा ॥ अथ पंचांगनिंबकल्पः ॥ पुण्यकाले तु संगृह्य फलकाले फला
नि च ॥ संगृह्य च प्रयत्नेन मूलं पत्रं त्वचा तथा ॥२७॥ छायाशुष्कं तु तच्चूर्णं भावयेत् खद
दिराम्बुना ॥ चित्रकोथ विडंगानि व्याधिमात्र कसंत्तकः ॥२८॥ भल्लातक हरीतक्याधा
त्री गोक्षारस्संयुतः ॥ कासमात्रक बीजानि पिप्पलीमरिचानि च ॥२९॥ द्वे हरिद्रे लोहचू
र्णसंयुक्तं नत्प्रमाणतः ॥ भावितं भृंगराजेण नपंचनिंबेन तत्समात् ॥३०॥ विडालपद
मात्रं तु पयसा लोड्य तं पिबेत् ॥ वारिणा यः पिबेत् प्राज्ञः शुभे काले शुभे दिने ॥३१॥
पीतमात्रं तु विज्ञायतत्क्षणादेव जीर्यते ॥ न किंचित्परिहारोस्ति भोजनं सर्वकामुकः ॥
३२॥ मासद्वित्रिप्रयोगेण जायते वीर्यवर्द्धनः ॥ अष्टादशानि कुष्ठानि सप्तमहानि
यात् ॥३३॥ वातगुल्मं च पित्तं च व्याधिः सर्वोप्यशेषतः ॥ हरेत्सर्वाणि मोहानि नाशयेच्चंद्र

२३ दर्शनं॥३४॥ पंचवर्षशतं तेश नं जीवी अपमृत्युविवर्जितः॥ सद्यः प्रत्ययकारं च पंचनिंब
रसायनं ३५॥ ॥अथ तृणज्योतिकल्पः॥ रात्रौ प्रज्वलते नित्यं तृणेन सदृशं भवेत्॥ तस्य
मूलं समाहाय क्षीरमध्ये निवेशयेत्॥३६॥ तत्क्षणाज्जायते रक्तं तन्तु क्षीरं पिबेद्बुधः॥
सप्तरात्रप्रयोगेण वलीपलितवर्जितः ३७॥ क्षीरेण नियताहारो लवणाम्लं च वर्जयेत्॥
द्विरष्टवर्षाकारो सौ जीवेद्वर्षसहस्रकं॥३८॥ तस्य मूलं तु संग्राह्य रसगंधकतत्समं॥
मातुलिंगरसेनैव एकीकृत्वा तु मर्दयेत्॥३९॥ लेपयेत्कुल्वपत्राणि त्रिपुटं हेमशोभनं॥
महिषीनवनीतेन तस्य मूलानि लेपयेत् ४०॥ कपिलाज्यप्रदीपं च नृकपाले शिवालये
कज्जलं धारयेत् प्राज्ञः कृष्णाष्टमी चतुर्दशी॥४१॥ पूजां कृत्वा विधानेन शुचिर्भूत्वा हि
साधकः॥ तेनैवांजितनेत्रस्तु अदृश्यो जायते पुमान्॥४२॥ ॥अथ श्वेतार्ककल्पः॥ २३॥

पुष्यार्केण गृहीत्वा तु श्वेतार्कः सर्वसिद्धिदः॥ पंचांगं चूर्णयेद्धीमान् मध्वाज्येन तु भक्ष
येत्॥४३॥ जीर्णे तु भोजनं कुर्यात् षष्टिकाक्षीरभोजने॥ वर्जयेत्तैलमाम्लं च मासमे
कं तु भक्षयेत्॥४४॥ वलीपलितनिर्मुक्तो महाबलपराक्रमः॥ श्वेतार्करोचना चैव वामे
हस्तकनिष्ठिके॥४५॥ ललाटे तिलकं कृत्वा त्रैलोक्यं क्षोभयेत्क्षणात्॥ तिलकं दृष्टमा
त्रेण प्रत्यामतिनिरामता॥४६॥ पंचांगं तस्य संग्राह्य छायाशुष्कं तु कारयेत्॥ विडा
लपदमात्रं तु घृतेन मधुना सह॥४७॥ एकविंशद्दिनं भक्षेत्स्मृतिर्मेधा प्रजायते॥ मासे
केन प्रयोगेन सर्वव्याधिविवर्जितः॥४८॥ मासद्वयप्रयोगेण सर्वरोगविवर्जितः॥
नवनागबलीभूत्वा सूर्यकांतद्युतिपरः ४९॥ द्विरष्टवर्षकायो सौ सहस्रायुर्भवेन्नरः
५०॥ षण्मासस्य प्रयोगेण अमरो जायते पुमान् ५१ क्षीराहारप्रभुंजानो वातातपवि

वर्जितः॥ कट्वाम्लतैलवर्ज्जस्स्यात् कषायरसवर्जितः ५१॥ एवमेवविधानेनसर्वसिद्धिर्भ
विष्यति ५२॥ अथमुंडीकल्पः॥ उत्तमंनागरंमुंडीसंचूर्णितंवस्त्रगालितं॥ गुडेनम
धुनागव्यसर्पिषामर्दितंपचेत्॥ ५३॥ स्निग्धभांडेनिक्षिप्यधान्यराशौनिधापयेत्
मासंमासंसमुद्धृत्य कृत्वाकायविशोधनं ५४ स्निग्धंभक्षयेत्प्राज्ञोविडालपदमात्र
कं॥ दिनसप्तप्रयोगेणसर्वरोगंनिवारयेत्॥ ५५॥ षण्माससेविताजीवेन्नरोवर्ष
शतत्रयं॥ बृहस्पतिसमोबुध्यासर्वशास्त्रविशारदः॥ ५६॥ नागार्जुनसमाख्यातः
कल्पोयममृताधिपः॥ अथपाठाकल्पः॥ पाठामूलंमुखेक्षिप्तंखड्गसैन्यंनिवारये
त्॥ ५७॥ तद्द्रवसर्पिषापीतंविषंसर्पस्यनाशनं॥ विद्युत्पातंतथाकांडेकरेबद्धंशि
खास्थितं ५८ दिव्यसंघप्रियत्वंचसर्वेषांकुरुतेसदा॥ मंत्रः॥ ॐ नमोमाहेश्वरीसिद्धे २८

श्वरीबंध २ हुंफट्स्वाहा॥ पाठामूलंगलेबद्ध्वाक्षीरभांडस्यतद्धि॥ जायतेनतस्त
णाद्दुग्धंसत्यमेवनसंशयः ५९ पुष्येसंगृह्यपाठायामूलमास्येविनिक्षिपेत्॥ गुह्य
समरसंरंभेशस्त्रास्त्रैर्नैवहन्यते ६० अथमूलकंदकल्पः॥ मूलकंदुद्वात्रिधाप्रोक्ताः
शुक्लोरक्तासितस्तथा॥ पुष्येभानौसितेपक्षेसमूलंपल्लवान्वितं॥ ६१॥ गृहीत्वाशो
षयित्वातुछायायांसूक्ष्मचूर्णितं॥ सुदिनेशुभनक्षत्रेसर्पिषासहभक्षयेत् ६३॥ जी
र्णतिष्यथभुंजातक्षीरान्नंवर्जितेंद्रियः॥ षण्मासाधोगतिर्यातिबलयः पतितैःसह
६४॥ घृतेनमधुसंयुक्तंसर्वव्याधिविवर्जितं॥ सर्पिषातुप्रयोक्तव्याबलिनंहंतिवेग
युक्तं नं॥ ६५॥ वातंकांजिकसंयुक्तंजलसमन्वितं॥ जलोदरेरेणचनक्रेणदभागुल्मभयो
ज्झनं ६६ कुष्ठंमध्वाज्यसंयुक्तंनिःशेषरोगवर्जितं॥ मूलकंदस्यवृक्षस्यसंवित्तिःशंभु
नोदितः ६७॥ अथमंत्रः॥ ॐ अमृतोद्भवायअमृतंमेकुरुठठः॥ धात्रीफलानिचूर्णानि

तिलचूर्णैः समांशकः॥ ६८ घृतमाक्षिकाभ्यां आलोड्य त्रिंशद्रात्रेषु भुज्यमानः पु
रुषो वृद्धोपि तरुणायते स्मारस्वतसिद्धिर्भवति॥ पालाशबीजचूर्णेन धात्रीफलचूर्णे
न समतुल्य भक्ताभ्यां समभागाभ्यां अग्निबलानुसारेण निद्राकाले भुक्त्वा पुरुषो ज
यति॥ शशिरेकाले अश्वगंधाचूर्णं तिलचूर्णं समाप्लुति माक्षिकाभ्यां आलोड्य व
हीनो भुक्त्वा मासेन वृद्धोपि यौवनं व्रजति॥ कुष्टचूर्णं तु मध्वाज्यं नित्यं कर्षं पिबेन्नरः
वत्सरं दिव्यदेहः स्यात् गंधेन शलपुष्पवत्॥ ६९ हरीतकी वचा कुष्टं पिप्पली विश्वभे
षजं॥ वटवृक्षत्वचा धात्री शंखपुष्पी तथैव च॥ ७०॥ एतानि समचूर्णानि कारयेत्सर्पि
षा सह॥ बिडालपदमात्रेण वलीपलितवर्जितः॥ ७१॥ सप्तरात्रं तु मेधावी श्रुत्वा श्रु
तिधरो भवेत्॥ एकविंशति रात्रेण स्वयमेव कविर्भवेत् ७२ अथ गंधककल्पः॥
ईश्वर उवाच॥ शृणु देवी प्रवक्ष्यामि यथा योगेन गंधकं॥ किमतेबहुधायोगोमृगु २५

घायतलोचने ७३॥ क्षीरोदसागरे देवि मथ्यमाने सुरासुरैः॥ उत्पन्नं संभृतं
सारं दिव्यरूपं महाबलं ७४॥ तस्य सुश्रोणि गंधेन मोहिताः सर्वदेवताः॥ गंधकं
नाम विख्यातं जरादारिद्र्यनाशनं ७५॥ पीतं चैव तथा श्वेतं कृष्णवर्णं तृतीयकं॥ सा
रक्तं च चतुर्थं स्यात् द्विमादीनां क्रमात्प्रिये ७६ वमनं रेचनं कृत्वा रसायनं समाच
रेत्॥ शुभे मुहूर्ते नक्षत्रे अर्चयित्वा जगत्पतिं ७७॥ वक्ष्यमाणप्रयोगेण भक्ष्यं पथ्या
दिकानि च॥ षष्टिकान्नं च भक्ष्याणि गोधूमाश्च वरानने ७८ बालकानि च मांसानि
तित्तिरिश्छागलानि च॥ कृष्णमुद्गाश्च सर्पिश्च सिताक्षीरं च तक्रकं ७९ एतद्धविस
दा पथ्यं अपथ्यं परिवर्जयेत्॥ कटुतिक्तकषायाणि तैलं कांजिकराजिकं ८० स्त्रीसे
वारोहणं यानं प्रवदातानुवर्जयेत्॥ कोद्रवान्नं कुलित्थं च वर्जनीयं पथ्यभोजने ८१
लवणाम्लविपाकानि द्विदलानि च वर्जयेत्॥ मंत्रेणानेन संमंत्र्य भक्षयेत्त्वं वरानने ८२

भागेलोकविस्मयकारकं।९८ज्योतिष्मतीति विख्यातंरसायनमनुत्तमं॥ कृतीयो
शुभनक्षत्रे शुभयोगे शुभेदिने ९९।कुंकुमाक्षतमात्रेण नामादौपरिमंत्रयेत्॥
अर्घ्यपाद्यंततोदत्वारक्ततंदुलसंयुतं।।५००॥रक्तचंदनकुसुमैरर्चयेदिष्टदेवतां॥
इष्टदेवतामंत्रेणतत्तन्नामंत्रेणवापुनः॥१॥कुर्यादर्घ्यादिकांपूजांनैवेद्यंचयथावि
धि॥उत्तराभिमुखोभूत्वासाधकःसुसमाहितः२॥सुगंधिकुसुमैर्युक्तंकुंकुमेन
विलेपनं॥तांबूलंभक्षयेत्प्राज्ञःसुतुष्टेनैवचेतसा३॥ यथोपस्कारसंयुक्तंपू
जयित्वामहोषधीं॥बीजानितस्यसंगृह्य शोषयेत्सम्यगातपे ४॥चूर्णयित्वातत
स्तानितेषांतैलंसमुद्धरेत्॥ततस्तैलसमंक्षीरंमधुपाकेनसंयुतं ५॥सुसंमृदग्नि
नापात्रेतैलशेषंतुकारयेत्॥जातिफलानिसंयुक्तमंकोलंकुष्ठमेवच ६॥एतानि

समभागानिचूर्णीकृत्वाविचक्षणः।कर्षमेकंतुतच्चूर्णंतैलमध्येसुरेश्वरी॥७॥
प्रक्षिप्यालोड्यतत्तैलंस्निग्धभांडेविनिक्षिपेत्॥ अछिद्रंमुद्रितंकृत्वातद्भांडेसुदृढं
ततः॥८॥धान्यराशौविनिक्षिप्य दिनानामेकविंशतिः॥त्रिंशद्दासप्ततिर्वापिनवति
र्वाशतावधिः॥९॥अधिकंवायथायोगंततउद्धृत्यतेनरः॥कृतिर्योमुकुका यस्तुनि
र्वातभुवनेश्वरि १०॥सुमुहूर्त्तेशुभेवारेशुभचंद्रेसुतारके॥कृत्वाह्निकःशुचि
र्भूत्वातैलंसूर्योदयेपिबेत् ११ततोनिःसंज्ञतांप्राप्यलब्धसंज्ञःशनैःशनैः॥परिश्रा
म्यचक्षारेणपानंदद्यान्मधुप्लुतं।१२। पीत्वाक्षीरंततःस्वस्थःशनैर्भवतिसाधक
ः॥जीर्णेतैलेततुपश्चाद्भोजनेषष्टिकोदनं १३॥ एवंक्षीरेणभुंजीयात्मत्यहंविरि
ताशनः॥सभवेत्सूर्यसंकाशोवपुषादिव्यतेजसा १४॥अश्रुतान्यपिशास्त्राणि
शीलयेद्धीयोगतः।खगेंद्रसदृशोलोके दिवापश्यतितारकां॥१५॥मध्यंदिनेगते

२६ ॐ नमो भैरवाय अमृतसिद्धाय अमृतसाध्याय जातवेदसे नं दि मे ब्द्रेण अमृतं त्वं कुरु कुरु मां
स्वाहा ॥ वायुर्वेगि निसिद्धिं कुरु स्वाहा ॥ अनेन मंत्रजाप्येन गंधकं ग्राहयेत्प्रिये ॥ गंध
कं त्रिफलाचूर्णं भृंगराजं समांशकं ॥ ८३ ॥ संवत्सरप्रयोगेण जीवेदाचंद्रतारकं ॥ सूत
कस्य प्रियं देवि चत्वारो गंधकस्य च ८४ ॥ दारुकायंत्रसंयुक्तं जायते भस्म सूतकं ॥ सं
वत्सरप्रयोगेण मम तुल्य पराक्रमः ८५ तस्य मूत्रपुरीषेण शुल्वं भवति कांचनं ॥
गंधकस्य पलं देवि भक्षयेच्च दिने दिने ८६ गंधकं त्रिफलायुक्तं घृतेन मधुना सह ॥
भक्षितं हिम हन्रोगान्हंति मासेन पार्वति ॥ ८७ ॥ गंधकं सूतकं चैव निर्गुंडीरसमर्दि
तं ॥ कुष्ठमष्टादशं हंति विषं हंति जरापहं ८८ गंधकं रससंयुक्तं सुगंधिरसमर्दितं
ताम्रपत्रप्रलेपेन त्रिपुटं कांचनं भवेत् ॥ ८९ ॥ गंधकं चूर्णं निक्षिप्य कषायं चांगुली
गजं ॥ एवं क्रमान्ततो देवि मर्दितं रसगंधकं ९० नवनीतसमा पिंडि जायते वरपिष्टिका ॥

२६

दत्वा लघुपुटं पश्चात् हेमपत्राणि लेपयेत् ॥ ९१ ॥ पुटपाकेन देवेशि वर्धते वर्णपं
चकं ॥ पुनर्नवान्वितं गंधं त्रिविधं विषनाशनं ९२ धात्रीरसेन संयुक्तो आज्ञी र्ग्रहरते
ध्रुवं ॥ गुडेन सह गंधं च प्रमेहस्य विनाशनं ९३ रसेन गंधकं पीतं सर्वव्याधिविना
शनं ॥ चूर्णं कृत्य पलानि पंच नितरां त्रिधा मान्मनोयत ततश्चूर्णस्य त्रिगुणेतु मार्क
वरसे छाया विशुष्कीकृतं ॥ पथ्याचूर्णमथो शिवा मधुघृतं प्रत्येकमेषां फलं चद्द्यो
यौवनमेति मासयुगलात्त्वा दं नरैः भक्ष्य हं ॥ ९४ ॥ अथ ज्योतिष्मतीकल्पः ॥
कैलासशिखरासीनं देवदेवं महेश्वरं ॥ प्रणम्य परया भक्त्या देवी वचनमब्रवीत्
९५ ॥ भगवन्मानवाः सर्वे घोरैः क्लिश्यंति दुष्कृतैः ॥ तेषामेव हितार्थाय सकृपव
त्के कृत्वा वद ९६ ॥ येनोपायेन देवेश सर्वे तुष्यंति मानवाः ॥ यन सिद्धिं र्निवेत्तां ते
यांति परां गतिं ९७ ॥ इति पृष्टं तदा देव्या विमलं नामथ्यात्रवीत् ॥ शृणु देवि महा

सूर्यं पश्येद्दिवि मिवापरः। शब्दं शृणोति सुमतो पिशीयंते परमंतपः १६ हंसन्यष्टादशकु
ष्ठानि सर्वरोगांनिहंतिच॥ एकमासप्रयोगेण फलमुक्तं सुरेश्वरि॥ १७॥ द्वितीयादि
षुमासेषु फलानि गद्यते शृणु॥ तानि वक्ष्यामि सर्वाणि दुर्लभानि दुरात्मनः १८ तृतीये से
वते यस्तु मासानां तु यथाविधि॥ यक्षराक्षसगंधर्वैः स संपूज्यो भवेन्नरः १९ एके च महा
ने घोराः कीर्त्तिताः पापकर्मणा॥ सर्वं च सेवयात स्य प्रयाति परमां गतिं २० चतुर्थस्य च
मासस्य शृणु देवि यथाफलं॥ देवान्यक्षान्किन्नरांश्च नागांश्चैव महोरगान्॥ २१॥
पाति तस्यैव सद्भावं कुर्वंति न तत्क्रियं सदा॥ पुटं द्वयमयं कृत्वा पुटस्याभ्यंतरे तथा॥ २२॥
सूत्रेण पूरयित्वा च [illegible] रवौ स्त्वा निधापयेत्॥ मासांते तत्समुद्धृत्य पुटं कांचनतां व्रजेत् २३
चतुर्थस्य तु मासस्य शृणु देवि यथाफलं॥ औषधं सेवते यस्तु पथ्यभोजनसंयुतं॥ २४॥
पुण्यश्लोके स्फुरन्मूर्त्तिः सर्वैश्वर्यसमन्वितं॥ वसेदमरलोकेषु दिनानि ब्रह्मणो दिनान् २५

तस्य मूत्रमलैः स्वेदैः स्नस्य उद्वर्त्तनेन च॥ शुल्वपत्रं लिपेत्तेनो दग्धं भवति कांचनं २६
षण्मासं कुर्वन स्तस्य शृणु सिद्धिं सुरेश्वरि॥ क्रीडते स महासिद्धो लक्ष्मीवानमरद्युतिः २७
शिवतुल्यो महावीर्यो विचरेत्स परितो जगत्॥ सप्तमे स समासं तु यो दिना नियतः सदा २८
जितेंद्रियो जितक्रोधो भूतानां च हिते रतः॥ विंशो दिनानि यावत्स तावज्जीवेत्स साधकः २९
धर्मो धर्मैर्न लिप्येत विधिवत्साधकोत्तमः॥ विचरित्वा महावीरः साक्षाद्देवमयो विभुः ३०
अष्टमासप्रयोगस्य शृणु देवि यथाफलं॥ दिव्यरूपो महातेजा दिव्यरूपधरो भवेत् ३१
निर्वाण परमाप्नोति ज्योतिष्मत्याः प्रभावतः ३२ तत्प्रयार्थं समालोक्य मार्गमार्ग प्रदर्श
कः॥ रसायनं परं दिव्यं गोपनीयं प्रयत्नतः ३३ नैतत्कर्म प्रकुर्वीत मोहेनोपहतो नरः
विघ्नेनोपहताः केचिन्नास्तिका अल्पबुद्धयः ३४ क्रियात्तानन्त माकिंचिन्मरणं शंक
याय था॥ नवमासप्रयोगेण शृणु देवि यथाफलं ३५॥ कामरूपी महाधीरं श्चिंतामणि

रिवोतमः। यद्यत्प्रतीच्छते रूपं तत्तद्रूपं प्रपद्यते ३६ इंद्ररूपं वायुरूपं चंद्ररूपं करोति यः
ब्रह्मरूपं विष्णुरूपं रुद्ररूपं करोति यः ३७ यत्र यद्रोचते रूपं तत्तत्कर्तुं प्रभुर्भवेत्॥ सो
द्राव्येन सुचूर्णीकृतं यदि निरोज्योतिष्मती पंचकं कोष्ठास्थं तु रसायनं त्रिफला मागो मू
त्र पक्वं घृतं॥ संयुक्तं च निशाद्वयं कृमिहरं चित्रोमराज्या युतं कुष्ठं भस्करसामुखाम
यहरं नश्यंति तिगौरवात्॥ ३८॥ अथ देवदालीकल्पः॥ देवदालीरसं गृह्य द्विगुणं
च रसं भवेत्॥ धात्रीरसेन संयुक्तं पाचयेल्लोहभाजने ३९॥ धात्रीशुष्कं धनिनेव पाच
येन्मृदुवह्निना॥ ततो नश्यमयं कुर्वीरेत भुंजंतस्य रिभोजनं ४० अपस्मारं क्षयं कुष्ठं वा
तं नश्यति तत्क्षणात्॥ प्रेतराक्षसभूतानि सप्ताहाद्दृष्टिं शमाचरेत् ४१॥ देवतालीर
सं क्षौद्रं पारदं मर्दयेद्यथा॥ नश्यक्रमप्रयोगेण वंध्या प्रसूयते नं भवेत्॥ ४२ देवताली
रसं क्षौद्रं सर्पिषा मर्केलकिरसं॥ सह भक्त्वा तु मेधावी श्रुतिधरो भवेत् ४३॥ देव २९

दालीरसं चैव क्षीरेण सम सर्पिषा॥ पिबेदेकमहोरात्रं मासे लिंगं समुद्धरेत् ४४॥
सपत्रां देवदालीं तु विधिनाच्च समाहरेत्॥ विष्णातु शुद्धिकां कृत्वा छायायां परिशोष
येत् ४५॥ प्रत्यूषे भक्षयेत्प्राज्ञः मणमप्रमभधजं॥ नश्यंति वातगुल्मानि ये चान्ये
व्याधयस्तथा ४६ देवदाल्यास्तु पंचांगं सूक्ष्मचूर्णं तु कारयेत्॥ तच्चूर्णं सर्पिषा लोड्य
यः पिबेत्सप्तरात्रकं ४७ सर्वभूतवशीकर्तुः स्त्रीणां प्रियतमो भवेत्॥ देवताली र
सं गृह्य श्वेतसिद्धार्थसंयुतं ४८ रिंगणीयासमामुक्तं गुटिकां कारयेद्बुधः॥ सुवर्ण
वेष्टितं कृत्वा शिरवायां वंधयेन्नरः ४९ राजानो वश्यमायांति स्त्रियः पुरुषास्तथा
नश्यंति सर्वरोगाश्च वनचरा ज्ञोभयं तथा ५० द्रावयेत्सर्वसत्वानि पारदं चैव शुध्यति॥
नरेंद्रैः कमनं हेमं गुंजामात्रं तु कारयेत् ५१ एकैकं भक्षयेत्प्राज्ञः जीर्णे तु भोजनं तथा
अम्लं च लवणं चैव वर्जयित्वा तु बुद्धिमान् ५२ क्षीरजं सुपीतं स्यात् मासमात्रप्रयो

गतः॥ अमरत्वमवाप्नोति सासाद्रुद्रइवापरः॥५३॥ शुक्लपक्षे पौर्णिमास्यां पुष्ययोगे
शुभे दिने॥ विधिनानुबलिंदत्वा पंचांगंतु समाहरेत् ५४ देवदालीरसंतुल्यं घृतंमधु
समन्वितं॥ सप्तरात्रंपिबेन्नित्यमेधावीजायतेनरः ५५॥ एकमासप्रयोगेण जीवेद्व
र्षशतद्वयं॥ नमस्कृत्वा सिताष्टम्यांचतुर्दश्यांततोनरः॥ जपेदष्टसहस्रंच होमांतेसे
व्ययत्नुमान्॥ अनेनैवप्रयोगेण नमस्कृत्वा जितेंद्रियः॥ ५७ प्रदक्षिणत्रयंकृत्वा
देवदाली समुद्धरेत्॥ ॐ नमो भगवते ईश्वराय सोमसंभवांय देवतालीन माम १
स्वाहा॥ ॐ महेशाय हृ ॐ भूताधिपतये शि॰ ॐ अमृत गमने शि॰ मारस २
स्वाहा॥ क॰ देवताली महाभूताधिपतये ने॰ महाबलाय स्वाहा अस्त्रं अथम
क्षमंत्रः॥ ॐ देव प्रयत्नेन निर्विघ्नं जायते ॐ नमः स्वाहा॥ सप्तजाप्येन मंत्रेण उ
 ३०

द्धरेत्प्रयत्नः शुचिः॥ शम्भुखो दम्भुखो वा पि उत्पाद्य सुसमाहितः ५८ प्रसा
ल्योत्ल खले नैव रसं गृह्य प्रयत्नतः॥ पथ्य सा भोजयेत् स्थाप्य पचेत्सम्यक् या
ग्निजित॥ ५९॥ वमनं रेचनं कृत्वा शुभवारे शुभे दिने॥ येकमासप्रयोगेण छि
द्रं पश्यति मेदिनी ६० जीवेद्वर्षसहस्रं तु महातेजाजयान्वितः॥ आदित्यस्य त्रिभि
र्मासैर्जायते च न संशयः ६१॥ अथ वै पंचमे मासि महादेवं प्रपश्यति॥ विष्णुः पिता
महश्चैव ये चान्ये दिव्यगामिनः॥ ६२॥ निमिषेण नरो याति योजनानां सहस्रकं॥ अ
न्यं तु संप्रवक्ष्यामि प्रयोगं शृणु पार्वति ६३॥ औषध्यास्तु समं गृह्य लक्ष्मणाया स
मेन च॥ उदक्याएच तद्दत्वा सा पुत्रं लभते ध्रुवं ६४॥ अस्या रसं घृतं क्षीरं दक्षीरद्व
संतुयः पिबेत्॥ रमते मुदितः स्त्रीभिस्तस्य लिंगं समुद्धरेत् ६५ अस्या रस घृतं क्षो

द्रं सर्पिणामलकीरसः॥ पीतमात्रेण मेधावी सर्वश्रुतिधरो भवेत्॥ ६५॥ अस्याः सर्पि
षमूलानि सूक्ष्मचूर्णानि कारयेत्॥ बिडालपदमात्रेण पिबेदुंबरवारिणा ६७॥ नत्तुगु लेने
ल्मोदरं प्लीहकुष्ठानिच भगंदरं॥ कृमल्यादि महारोगान्नाशयति न संशयः ६८ अ
स्याश्चूर्णंतु संगृह्य वाजिगंधासमन्वितं॥ सर्पिषा भक्षयेन्नित्यं वशीकरणमुत्तमं॥ ६९
यां यां कामयते पूर्वं तां तां भवति वल्लभः॥ सिद्धार्थी देवलाली च लक्ष्मणया समन्विता
७० पीत्वा नारी सहस्राणि रमते नात्र संशयः॥ अस्यारसं स्वहस्तेन पेषयित्वा तु यः पिबे
त् ७१ तत्क्षणा द्दृशमाप्नोति नात्र कार्या विचारणा॥ अस्यारसं तु संगृह्य विष्णुक्रांता स
मन्वितं॥ ७२॥ पारदं बंधयेदाशु तारं हेममयं भवेत्॥ अस्यारसं तु केनश्यानेत्रयोरं
जयेत्सदा ७३॥ तस्य सर्वाणि भूतानि पश्यंति नात्र संशयः॥ अस्यारसं तु संगृह्य
गोक्षीरसंयुतं ७४॥ पीत्वा वंध्या लभेत्पुत्रं नात्र कार्या विचारणा॥ इति संग्रहश्लोकेषु

६१ ३१

वदेयं यस्य कस्यचित्॥ ७५॥ गोपनियं प्रयत्नेन इत्याज्ञा परमेश्वरी ७६॥ अथैरं
डकल्पः॥ अथान्यं संप्रवक्ष्यामि शृणुष्वायतलोचने॥ एरंडकल्पमख्यातमुक्तमं श
करंतृणां ७७॥ पुनरन्यं प्रवक्ष्यामि तुष्टश्शृणुष्व विशेषतः॥ चतुर्विधंतु विज्ञेयं रक्तपीतादि
भेदतः॥ ७८॥ तत्तैलं सूर्यवारेण ग्राहये द्विधिवत्ततः॥ रक्तएरंडतैलेन शुद्धसूतकगं
धकैः॥ ७९ मेलयित्वा पचेत्तैलं लोहपात्रे विशेषतः॥ याममात्रं पचेद्धीमान् गुंजं गुंजा
निभं भवेत्॥ ८०॥ ततारनागपत्रेषु सहस्रांशेन वेधयेत्॥ तत्तैलं मधुनायुक्तं गंधकेन
समन्वितं ८१॥ भुवि मासं विनिक्षिप्य ततोद्धृत्य तु संग्रहेत्॥ प्रातर्निष्कचतुष्कं तु लिहे
दहनमुत्तमं॥ ८२॥ तरुणादित्यसंकाशो भवेन्मासप्रयोगतः॥ शुद्धकोष्ठकृतः सेवे
त् गुरोर्वचनपूर्वकं॥ ८३॥ क्षीराहारं प्रकुर्वीत सत्यवाक् विजितेंद्रियः॥ मासद्वयप्र

योगेन सहस्रायुर्भवेन्नरः ८४॥ मासत्रयप्रयोगेण जीवेदाचंद्रतारकं॥ मासष
ट्कप्रयोगेण ब्रह्मायुः संभवेन्नरः॥ ८५॥ संवत्सरप्रयोगेण विष्णुतुल्यो भवेन्नरः।
द्वादशाब्दप्रयोगेण जीवन्मुक्तो न संशयः। ८६। कृष्णैरंडस्य तैलं तु कृष्णा गोक्षीर
संयुतं॥ शुरुकोष्टं पिबेत्सद्यः सर्करैरपि दृश्यते। ८७ कृष्णगोक्षीरसंयुक्तं मधुना च
समायुतं॥ तत्तिलपिष्टमानस्तु बद्धो भवति पारदः। ८८। मृतयोगे सहस्रे द्वे द्विधा मज्ज
नमात्रकं॥ तद्गंधदमायाति यावदाचंद्रतारकं ८९। तद्गधारणो देवः खेचरः स
तु जायते। अंजनात्सप्तपातालं पश्येन्मध्याह्नभास्करे ९० सर्वांजनमिदं ख्यातं सि
द्धयोगमुदाहृतं॥ अवध्यो देवदैत्यानां विष्णुलोके चरत्यसौ। ९१। श्वेतैरंडस्य मूलं तु
गृहीत्वा पुष्यभास्करे॥ तत्तैलेन तु घृष्टं तु कर्पूरेण समन्वितं ९२ अंजयेन्नेत्रयुगुलं

सप्तपातालदर्शनं॥ सिद्धांजनमिदं सिद्धं सिद्धयोगविनिर्मितं॥ ९३॥ तत्फलं मार्गपा
षाणस्तु ढूतसमन्वितं॥ त्रिकुचद्रवसंयुक्तं पिष्टं मंधमुखा गतं धमेत्॥ ९४। शा
ल्मलीखदिरांगारैर्बद्धो भवति तत्फलं॥ तद्गेषु कुनो क्षिप्तं सहस्रांशेन वेधकृत्॥
९५ श्वेतगोक्षीरसंयुक्तं तन्मूलं निष्कमात्रकं॥ लिहेद्वा घृतसंयुक्तं क्षीराशी च जिते
न्द्रियः ९६ मासमेकप्रयोगेण चंद्रवन्निर्मलो भवेत्॥ मासद्वयप्रयोगेण दिवा प
श्यति तारकं ९७ मासत्रयप्रयोगेण खेचरत्वं लभेन्नरः॥ मासषट्कप्रयोगेण पा
तालं पश्यति ध्रुवं ९८ संवत्सरप्रयोगेण जीवेद्ब्रह्मदिनाष्टकं॥ पीतैरंडस्य मूलं तु
ग्राहयेत्पुष्यभास्करे ९९ छायाशुष्कं ततः कुर्यात् नवनीतेन पेषयेत्॥ त्रिकटु त्रि
फलायुक्तं सिताज्य मधुसंयुतं॥ १०० स्निग्धभांडे विनिक्षिप्य भूतले च ततः क्षिपेत्

३३ मसादुद्धृत्यतन्नित्यंलिहेन्निष्कंतुयत्नतः १॥ निवासाद्दीक्षराशीनितिष्ठेदम्लानमानसः
एकमासप्रयोगेणबलीपलितवर्जितः २॥ मासत्रयप्रयोगेणजीवेदाचंद्रतारकं। संव
त्सरप्रयोगेणदेवनैःसहमोदते। ३॥ अथमुसलीकल्पः॥ अथवक्ष्यामिदेवेशिमुसलीक
ल्पमुत्तमं॥ स्वर्णपुष्पीचखर्जूरीपत्रवत्यातिशोभनं॥ ४॥ अतिश्वेताचनाराचमुसली
मुसलीस्मृता॥ तन्मूलंचसमुद्धृत्यछायाशुष्कंतुचूर्णितं॥ ५॥ कर्षमध्याज्यसंयुक्तंमा
नःशुद्धःसमुल्लिहेत॥ जीर्णेदुग्धान्नभोजास्याद्रात्रौसांन्नतुविवर्जयेत॥ ६॥ षण्मासिप्र
वेशालोकह्रेपिलभनेध्रियं। पयसामुसलिचूर्णंदग्धकायःपिबेत्सुधीः॥ ७॥ वर्षाश
तमवाप्नोतिशतस्त्रीगमनेपटुः॥ ८॥ ॥इतिशिवप्रोक्तायांकल्पलतायांमुसलीकल्पः
समाप्तः। शके १७८८ व्ययनामसंवत्सरेमाहिमार्गशीर्षशुद्ध ८ बुधवासरेसमाप्तः ३३

अथअनुक्रमणिकाप्रारंभः

१ लक्ष्मणाकल्पः	११ काकजंघाकल्पः	१८ बिल्वकल्पः	२३ निंबकल्पः
२ शिवलिंगीकल्पः	१२ उटकटारीकल्पः	१९ जलपिंपली०	२३ तृणज्योतिकं०
३ करंजकल्पः	१२ निर्गुंडीकल्पः	१९ देवदालीकं०	२३ मंदारकल्पः
३ पालाशकल्पः	१३ कटुंडलीकल्पः	१९ रक्तगुंजा०	२४ सुंठीकल्पः
३ पुनर्नवाकल्पः	१३ माकाकल्पः	१९ श्वेतगुंजा०	२४ पाहाडमूलकं०
८ हरिद्राकल्पः	१४ त्रिफलाकल्पः	२० ब्राह्मीकं०	२५ भूकदंबकल्पः
९ कटुकीकल्पः	१४ मुसलीकल्पः	२१ वंदाककं०	२५ गंधककल्पः
९ अश्वगंधाकल्पः	१५ मुंडीकल्पः	२१ बावचीकं०	२७ कांगुणीकल्पः
१० अंकोलकल्पः	१६ चित्रककल्पः	२२ रुदंतीकं०	२८ देवदालीकं०
१० शाल्मलीकल्पः	१७ मंडूककल्पः	२२ पालेयवेरं उभेदः	

३४ ३२ येरंडकल्पः
३३ मुसलीकल्पः
३४ अनुक्रमणी

इतिकल्पलतासमाप्तः

३४